b. हाहेति क्रन्दत्येवं पाप ईदृङ्मया कृतम् ॥

88. a. C मानुष्यं मे पुनः केन कर्मणा स्यादिति ब्रुवन् ।
CD मानुषत्वं[1] महाभाग्यं[2] दुर्लभं चैव भारते ।
D₂ लभते भूमि भारते ।

---

T 85. Na. नानाक्रन्दपुरं सुततभवनं रौद्रं पयोवर्षणम् ।
b. शीताढ्यं बहुभीतिधर्मभवनं याम्यं पुरं चाग्रतः ॥

T 86. Na. त्रयोदशेऽह्नि प्रेतो यन्त्रितो यमकिंकरैः ।
b. तस्मिन्मार्गे व्रजत्येको गृहीत इव मर्कटः ॥

१ D₁ °ष्य (→°ष°); D₂ °त्व (→त्वं); २. D₂ °ग

89. a. तत्प्राप्य[१] न प्रदत्तं हि याचकेभ्यः स्वकं धनम् ।

$A_{1-3}B$ $A_{1-3}$ न[२] तत्प्राप्य प्रदत्तं हि

$B_1$ तच्च प्राप्य न प्रदत्तं

b. पराधीनं तदभवदिति[३] ब्रूते स गद्गदः[४] ॥ ८९ ॥

AB $A_4$ भवेत्सर्वमिति $A_1$ रौति

$B_{1-2}$ पराधीनमभूत्सर्वमिति

90. a. किंकरैः पीड्यतेऽत्यर्थं स्मरते[५] पूर्वदैहिकम्[६][७] ।

ABD $A_2$ किन्नरैः $D_1$ स्मरन् स्वकर्मपूर्वजम् ।

b. सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा ।

$A_1B_1$

c. पुरा कृतं कर्म सदैव भुज्यते देहिन् क्वचिन्निस्तर यत्त्वया कृतम् ॥ ९० ॥

$A_1B_1$

$B_1$ शरीर हे निस्तरय त्वया कृतम् ॥

91. a. मया न दत्तं[८] न हुतं[९] हुताशने[१०] तपो न तप्तं[११] हिमशैलगह्वरे ।

A-D D त्रिदशा न पूजिताः ।

b. न सेवितं गांगमहो[१२] महाजलं शरीर हे निस्तर[१३] यत्त्वया कृतम्

A-C $A_4$ जलं स्तुतः $A_{1-2}$ देहिन् क्वचिन्

$B_1C$ निस्तरय त्वया कृतम् ॥

92.× a. जलाश्रयो[१४][१५] नैव कृतो[१६] हि निर्जले मनुष्यहेतो[१७] पशुपक्षिहेतवे ।

$A_{1,3-4}$ $A_1B_3$ जलाशयो $A_4B_{2-4}$ निरुदके

$BD_2$

b. गोतृप्तिहेतोर्न कृतं हि गोचरं शरीर हे निस्तरय त्वयश कृतम् ॥ ९२ ॥

$A_{1,3-4}B$

$A_4B_{2-4}$ विनुक्त $A_1$ देहिन् क्वचित् निस्तर यत्त्वया कृतम् ॥

---

१. $B_4$ तत् प्रांप्रा° (→तत्प्रा°); २. $A_3$ त°; ३. $A_4$ °वे°; ४. $A_4$ °दं ५. $D_2$ °त्वं; ६. $A_4$ °दे°; ७. $D_2$ देहकं (→दैहिकम्); ८. $D_2$ °त°; ९. $B_2$ °त; १० $B_3$ ⊙; $D_2$ °नं; ११. $D_2$ °या न दर्त (→°पो न तप्तं); १२. $B_4$ °हां; १३. $B_4$ ति°; १४. $B_2$ °क्ष; १५. $D_2$ °यौ; १६. $D_2$ क्रतौ (→कृतो); १७. $A_4$ °ताः; $D_2$ °तौ;

× Mss put *śl* 92·94 in different sequence, namely.
$A_{2-4}$ $B_4C$ = 92·93.94; $A_1$ = 93.92.94; $B_{1-3}$ = 92.93 only.

89. a. तत्प्राप्य न प्रदत्तं हि मया किंचिद्द्विजातिषु ।
D D1 तं प्रानप्रदं प्राप्य नं सुखद ग्रहं····(?)

b. पराधीनस्तदा जंतुर्ब्रूत एव स गद्गदः ॥
D2 पराधीनकृतं तत्र ब्रूतेत्थं विवशाशनै ॥

90. a. किंकरैः पीडितोऽत्यन्तं स्मरेत्प्राक्तमात्मनः ।
C
D
←

91. a.
CD
←

b. न सेवितं ($D_2$°ते)स्वर्गनदीमहाजलं कामादयो नैव जिताःसुपर्वसु ॥
D D2 शरीर भीयानु भयाक्रतानि—(?)
C
←

92. a. जलाश्रयो नैव कृतो गतोदके सत्रं च वै नान्न मया कृतं मया (?)
C
$D_2$
←

b. C नो तप्तहेतोर्नाकृतं च गो शरीर हे निस्तर यत्त्वया कृतम् ॥
CD2 गोतृप्तिहेतोर्न कृतं हि गोचरं शरीर भोगानि भया क्रतानि ॥

93. a. न दित्यदानं न गवाह्निकं कृतं वेददानं न च शास्त्रपुस्तकम्
$AB_{1}$-$_{3}$-$_{4}$C B₃ दानं—

B4 दानकम् ।

b. पुरा न[१] दृष्टं[२] (B1-4 इष्टो) न च सेवितोऽध्वा

$A_{23}$ बुद्धया[३] ($B_3$ बुध्वा) $B_3$-$_4$C न हि C वृषः

शरीर हे निस्तरय त्वया कृतम् ।। ९३ ।।

A1-2 देहिन् कचिन्निस्तर यत्त्वया कृतम् ॥

94. a. मया न भुक्तं पतिसङ्गसौख्यं वह्निवेशो न कृतो मृते सति ।
$AB_4$

b. तस्मिन्मृते तद्व्रतपालनं वा देहिन् क्वचिन्निस्तर यत्त्वया

कृतम् ।। ९४ ।।

95. a. मासोपवासैर्न विशोषितं वपुश्चा[५]न्द्रा[६]यणै[७]र्वा नियमैश्च[८] सुव्रतैः[९] ।
$ABD_1$ $A_4B_2$-$_3$ विशोधितं[४] A1-2 संहतैः

B1-4 च ($B_4$हि) शोधितं A3 सद्गतैः

b.
$D_1$
→

c. नारीशरीरं बहुदुःखभाजनं लब्धं मया पूर्वकृतैर्विकर्मभिः

।। ९५ ।।

C कृतैश्च कर्मभिः ॥

96.
→

---

१. A3 B3.4C पुराण (→पुरा न); २. C द्रष्टा (→दृष्टं); ३. A3 बुद्धया
४. $B_2$ °सां°; ५. $A_2$ °न्द्रया°; $A_4$ °पुः चांद्रा (→°पुश्चान्द्रा°);
६. $A_2$ °र्णै; B2D1 °नै; $B_3$ ⊙ यणै; ७. $B_3$ °र्व्वा; ८. A4 B1-4 °स्तु
९. $B_3$ °तै;

93. a. न नित्य[१]दानं न गवाह्निकं कृतं न वेदशास्त्रं न पुराणसंहितम् ।
D D2 गवादिपूजनं वेदनानं न च शास्त्रपूजनम् ।
←C

b. न प्रासवानायत सौष्य(ख्य ?)संचयं शरोरतो सेचत्वं कथम् ॥
D2 न रक्षितं प्राणभयातराणं शरीरभोगानि मया कृतानि ॥

94. a. मया न भुक्तं पतिसौरभ्यसङ्गतं वह्निप्रवेशो न कृते सति ।
C

b. तथापि नैतद्व्रतपालनं शरीर हे निस्तरय त्वया कृतम् ॥

95. a. मासोपवासैर्न विशोधितं वपुश्चान्द्रायणाद्यैर्नियमैर्न सद्व्रतैः ।
C
D1
←
b. तथानुभुक्तं यतिसौख्यसंगतं शरोरतो निस्तर सेचत्वं कथं ।
D1

c.
C
←

96. a. इत्यादिवाक्यानि लपन् प्रताहितः दुःखेन मार्गे यमदूतनीतः ।
C b. एको प्रतीक्षेन्न श्रिलामित्य साद्धं विख्यापयत्कर्म कृतं च पूर्वम् ।

---

१. D2 न भ्यत्य (→न नित्य°)

97. a. **उक्तानि वाक्यानि मया नराणामतः[1] शृणुष्वा वहितोऽपि (B1 हि) पक्षिन् ।**

A1.2 निवाच्यानि B1-4 नराणां मत्तः[2] A4 वहितश्च

b. **स्त्रीणां शरीरं प्रतिलभ्य देही ब्रवीति कर्माणि कृतानि पूर्वम् ॥ ९७ ॥**

A4B2.4 तु विलंघ्य

$B_2$ तु विलक्ष्य

B1 स्त्रीणां च देहं त्वलम्ब्य

---

१. $A_4$ °णां अतः (→°णामतः); २. B. $B_3$ °तः ; ३. $B_3$ °क्षीन्

## ACTIVITIES OF THE ALL-INDIA KASHIRAJ TRUST

(January-June 1985)

### Garuḍa Purāṇa Work

During the period, collation of a Bengali manuscript of the Ácārakāṇḍa has been in progress and is expected to be completed in a few months. Two Devanāgarī manuscripts of Pretakalpa from the Oriental Institute of Baroda were also taken up and the collation has been completed. The preparation of the Subject Concordance of the Garuḍa with other Purāṇas and the Mahābhārata and Rāmayaṇa is also in progress.

### Work on the Mānasakhaṇḍa of the Skanda Purāṇa

Further ten chapters (Ch. 21-30) of the Mānasakhaṇḍa have been edited and are published in this issue. Thus thirty chapters have been published so far.

### Sivadharmottara Purāṇa

Some more manuscripts of the Śivadharmottara Purāṇa have been procured from South India and collation of these will be taked up soon. Dr G. Bonazzoli, Editor of this project, left for Rome in April 1985 to assess the possibity of using computers for collation of manuscripts and their editing. He will also be visiting U. S. A. on this trip and attending a Purāṇa Conference at the Wisconsin University in August 1985.

### Veda Pārāyaṇa

During the bright fortnight of the month of Māgha (January-February 1985), the Taittirīya Śākhā of the Kṛṣṇa Yajurveda was recited from memory in its entirety, with the Saṁhitā, Brāhmaṇa and Upaniṣad in Vyāsa temple of Ramnagar The recital was performed by Sri V. Dendukuri Venkata Subrahmanya Somayaji. Vedamurti Sri Ganesh Bhatta Bapat was the Śrotā. On the conclusion of the Pārāyaṇa, customary Dakṣinā and food were offered to the reciter and the Śrotā.

**Visitors to the Purāṇa Department**

During the period under report the following distinguished persons visited the Purāṇa Department of the Trust :

1. Dr. G. C. Tripathi, Principal, Ganganath Jha Kendriya Vidya Pith, Allahabad on 15 February, 1985.

He wrote in the visitors' book : "The Purāṇa Department of the Kashiraj Trust is doing yeoman's service towards scientific interpretation of our ancient heritage enshrined in the Purāṇas. Owing to thoroughness of the scholars and the meticulous care they take towards editing the texts, their editions of the Purāṇas are reliable and authentic. I studied their method of collating the texts and found it flawless. The staff of the department are nice, friendly and cooperative and the whole atmosphere is charged with dignity and grandeur of the Royal house of Kashi. This is at last a place where the people seem to be primarily concerned with or perhaps solely devoted to the selfless pursuits of knowledge without any outward projection of the self. I wish it sucess in all its endeavours."

2. A group of fifty scholars and high priests from Thailand visited the Purāṇa Deptt. on 1 March 1985.

The group was led by the Ven. Phra Rajavaramuni, Hon'ble Member of the Siam Society. The group met His Highness, the Chairman and discussed various cultural and educational problems relating to Buddhist studies and exchanged views on mutual cooperation between the cultural heritage of the two countries. His Highness presented a copy of the Purāṇa as a token of appreciation of the visit of the group. The Ven. Phra Rajavaramuni writes in the visitors' book : It was our great pleasure and honour to have the opportunity of meeting His Highness the Maharaja of Benares and to have the chance of seeing His Highness's museum. We also greatly appreciate His Highness's great contribution to the education of the nation".

3. Dr. Ram Karan Sharma, Vice-Chancellor of the Sampurnanand Sanskrit Vishvavidyalaya, Varanasi-13 June 1985.

His Excellency Sri C. P. N. Singh, Governor of Uttar Pradesh, visited Varanasi in the last week of March 1985 on the eve of his retirement as Governor of U. P. His Highness Maharaja Vibhuti Narain Singh, Chairman of the All-India Kashiraj Trust, hosted a Tea party in honour of the Governor at the Nandesar Palace to which eminent scholars, educationists and officials of Varanasi were also invited. On this occasion His Highness presented the Governor a copy of the Hindi translation of the Varaha Purana published by the Trust.

**Publication of Dr. R. C. Hazra Commemoration Volume**

To commemorate the invaluable contribution made by the Late Dr. R C. Hazra to the field of Puranic studies and research, the All-India Kashiraj Trust decided to collect and publish his articles scattered over journals in one volume. The Purāṇa Vol. XXVII No. 1 was dedicated as Dr. Hazra Commemoration Volume in which most of his articles on the Purāṇa-s were included. Therefore, his other selected articles including Puranic also are being published in two parts, one of which will include articles on the Purāṇas and the Vedas, while the other will be devoted to his articles on Kāvya, Arthaśāstra, Dharmaśāstra, etc. Dr. Hazra's daughter, Srimati Jayanti Biswas has taken a keen interest in having these volumes published and has very kindly provided the Trust with re-prints of Dr. Hazra's articles some of which were corrected by himself.

**Prime Minister Sri Rajiv Gandhi's Visit**

The Prime Minister Sri Rajiv Gandhi visited Varanasi on 1 December 1984 in connection with the elections to the Lok Sabha. His Highness the Chairman received the Prime Minister at the Babatpur Airport on arrival.

On 26 February 1985, Sri Rajiv Gandhi after a tour of the constituencies in the Eastern Region of the State on the eve of the elections to the State assembly empland at the Babatpur Airport for Delhi. His Highness saw the Prime Minister off at the airport.

**Sri Kashi Visvanath Temple Trust**

A meeting of the Board of Trustees of the Kashi Visvanath Temple Trust was held at Nandesar Palace on 4 June 1985 under

the Chairmanship of His Highness Maharaja Dr Vibhuti Narain Singh. The Chairman hosted a lunch for the members of the Trust after the meeting.

## MAHARAJA BENARES VIDYA MANDIR TRUST

**Vasanta Mangalotsava :**

The Trust celebrated the Vasanta Mangalotsava beginning on the first Tuesday after the Holi festival as in the past years. The Utsava lasted three days from 12 March to 14 March, 1985. There were vocal recital of classical music and also instrumental recitals on the first two days. The participants in the festival were drawn from the Faculty of Performing Arts of the Banaras Hindu University and included senior students also. His Highness the Chairman, members of the Royal Family, gentry and district officials graced the performances.

**Vidya Mandir Museum :**

The museum run by the Maharaja Benares Vidya Mandir Trust attracts visitors from all over India and abroad throughout the year. Its unique collection of palanquins, howdas, ambaris and ornaments and paraphernalia of elephants, its collection of textiles and artifacts of marble, an armoury tracing the evolution of arms over 17th century, exquiste ivory work executed by Darbar craftsmen of the Benares Raj, its small but interesting section on natural history of the region and the famous Dharma-Ghadi (the Clock of Dharma) hold the interest of the young and old. It is fast becoming an educational museum for young boys and girls of schools from far and near. Distinguished visitors visited the museum and some of them recorded their impressions in the Visitors' Book kept at the museum. The Ven. Phra Rajavaramuni of Thailand along with a number of Bhikhus visited the museum and met His Highness the Chairman. Madame Catherine Clement, Secretary General, Festival of India in France, visited the museum on the Christmas Day 1984 and wrote in the Visitors' Book: "It is something which leaves strong memories; a very old story lingers in this beautiful museum; thanks to His Highness the Maharaja of Benares"

**Dhrupada Mela :**

The Dhrupad Mela conducted by the Trust entered its eleventh year of celebration this year. The Mela was held as in the past for three days concluding on the Maha-Sivaratri day in a night-long programme. The Mela was inaugurated by Maharaj Kumar Anant Narain Singh Bahadur. Eminent Dhrupad singers from all over the country participated in the Mela. Three awards were instituted from last year for the best Dhrupad musicians; two for vocalists and one for instrumentalist (Pakhawaj or Vina). His Highness Maharaja Citra Tirunal Bala Rama Varama of Travancore has graciously given a donation of Rs 1 lakh to give away these awards every year in the name of the illustrious composer-Prince Maharaja Swati Tirunal of Travancore who was a great patron-composer of Karnataka style of music and a contemporary of the Trinity of that style, namely Saint Tyagaraja, Diksitar and Syama Sastri. Maharaja Swati Tirunal also composed music in the Hindustani system especially suited to Dhrupad style and as stated by Maharaj Kumar Bahadur in his inaugural speech, the association of Maharaja Swati Tirunal's name with the Dhrupad Mela was a significant step in promoting national integration. The Mela as in the past was organized with the able support of Prof Sri Virbhadra Misra, the Mahantji of the Sankatamochana Temple and the Sankatmochan Foundation which he heads. The Mela has always been held in the premises of the Temple of Tulsidasji at the hallowed Tulsi Ghat on the bank of the Ganga. For this Mela Sangeet Natak Academy New Delhi has given a grant of Rs. 5000 and the U. P. Natak Academy has granted Rs. 2000.

**Maharaja Udit Narain Singh Manas Prachar Nidhi**

In the month of Vaisākha, Śukla Pakṣa 1 to 9 (April 22-30), Navāha Pārāyaṇa of the Ramacharitamanasa was performed in the Kali Temple of Chakia. Discourses upon the Ramacharitamanasa were also given by eminent Vyasas in the evenings throughout this period. Manasaratna Sri Srinath Misra spoke on two days. Large numbers of devotess attended the week-long Katha. His Highness Maharaja Dr Vibhuti Narain Singh was present during the Katha throughaut along with the citizens of Chakia and Divisinal officers. A havana and bhandara were also held on

the concluding day of the Katha on 30 April 1985. The Navaha Parayana and the discourse on the Ramcharitamanasa are proving more and more popular and the function attracts people of Chakia and surrouuding areas in large numbers.

**Maharaja Kashi Naresh Dharmakarya Nidhi**

This Trust organizes observances of various resigious rites, festivals and celebrations coming down from generations and also runs three educational institutions : The Maharaja Balwant Singh Degree College, Gangapur, the Maharaja Mansa Ram Law College, Raja Talab (now part of the Maharaja Balwant Singh Degree College) and the Maharani Ram Ratna Kumwari Sanskrit Pathsala, Ramnagar. These instituions are making good progress and their results are satisfactory.

# पुराणम्

(भागः-२७; अङ्कः-२)

# PURĀṆA

(Vol. XXVII. 2)

# संस्कृत-खण्डः

संस्कृतविद्वांसोऽभ्यर्थ्यन्ते यत्ते पुराणपत्रिकायां प्रकाशनार्थम् (१) पुराणगत-दर्शनशास्त्र-धर्मशास्त्रविषयपरान् लेखान् (२) पुराणोक्त-दुरूहार्थकास्पष्टार्थकवचनव्याख्यापरान् लेखांश्च प्रेषयेयुरिति ।

# आङ्गलभाषानिबद्धानां लेखानां संक्षेपाः

## इतिहासपुराणवर्णितो रावणः

## RĀVAṆA IN EPIC AND PURĀṆA

CLIFFORD G. HOSPITAL

इदानीं तामिलनाडुराज्ये मतमिदं प्रचलति यद् रावणो द्राविडजातेर्वीरः (नेता), रामश्च आक्रमणकारिणामार्याणां प्रतिनिधिभूतः। दृष्टिरियं रामायणग्रन्थ-विरोधिनी। जैनाचार्यंकृता रामायणकथा प्राचीनतरद्राविडमतानुयायिनीति दिनेशचन्द्रसेनमहोदयस्य मतम्। फिलिओजैट्-महोदयो वक्ति—रामायणे रावणचरितं दौरात्म्यपूर्णमेव दर्शितमिति न कथयितुं शक्यते। रामायणदर्शिते रावणचरिते यत् सांकर्यं दृश्यते (यथोक्तं फिलिओजैट्महोदयेन) तस्य परीक्षणमिह क्रियते, पौराणिकदृष्टया रावणस्य यत् स्वरूपं तदपि विव्रियते।

(क) रामायणस्य द्वितीयः षष्ठश्च काण्डौ प्राचीनतरौ। अत्र रामो मानवो नेता च। सप्तमे काण्डे प्रथमे काण्डे च प्रायेण रामो विष्णोरवताररूपेणाभ्युपगतः। रामायणस्य प्राचीनतरे चांशे रावणो न नीचजनरूपेण वर्णितः।

रावणस्य दर्शनमस्माभिः प्रथमतः क्रियते अरण्यकाण्डे सीताहरणप्रसंगे; पुनर्यत्र रावणः स्वमुखेनात्मानम् प्रशशंश तत्र च। उभयत्र लङ्कापुरी-पुष्पक-विमानादिवैभवानामुल्लेखो दृश्यते।

रावणस्य पापाचरितापि प्रोक्ताऽस्मिन् काण्डे। स धर्मं यज्ञं च ननाश, परपत्नीर्जहार च। विभीषणेन रावणस्य धर्मपरायणतोद्घोषिता; शूर्पणखया पुनस्तस्य इन्द्रियपरायणता—इत्येवं परस्परविरुद्धधर्मा रावणे दर्शिताः। यद्यपि परस्त्रीदूषणं राक्षसानां स्वभाव इत्युक्तम्, तथापि सीतां प्रति रावणो मर्यादां न विजहौ—इति नापलपनीयम्।

मिनोरुह्र-नामधेयेन विदुषेदं प्रतिपादितं यद् धर्मशास्त्रीयराक्षसविवाहरीतिः खलु रावणेन नानुसृता, पैशाचरीतिश्च आदृता। वस्तुतो राक्षसनामक-विवाह-भेदेन सह राक्षसजातेश्च संबन्धोऽस्त्येव। मन्वादिदर्शितो राक्षसविवाहभेद-विवरणम् अर्वाक्कालिकम् इति संभाव्यते। सीताप्रसंगे रावणो न हठसंभोगकारी।

रावणचरितस्यान्ये अंशा अपि विरुद्धधर्मवन्तः। ब्रह्मणो वरं लब्ध्वैव रावणः सदम्भो जात इति राम-कथनाद् विज्ञायते यत् स्वरूपतो रावणो न दम्भादिदोष-भाक्। रावणवधानन्तरं विभीषणस्य यो विलापो दृश्यते, ततो ज्ञायते यद्

विभीषणं प्रति रावणस्य प्रेमान्वितः संबन्ध आसीदिति। मन्दोदरीविलापोऽपि रावणचरितस्य राक्षससमाजस्य च गौरवं प्रख्यापयति। रावणस्यान्त्येष्टिकर्म ब्राह्मणवत् कृतमिति विस्मयमावहति।

उत्तरकाण्डगता रावणचरितकथा नैकमुखीनाः। अन्यत्र रामायणे यत् सामान्यत उक्तं तद् विस्तरेणोक्तमस्मिन् काण्डे! अत्र रावणस्य जन्म, तपश्चरणं, वरप्राप्तिश्च विस्तरेणोपवर्णितानि, सामान्यत एषामुल्लेखोऽरण्यकाण्डे। तत्रैव रावणकृतकुबेरपराजयः, रावणनामहेतुश्चोक्तौ। रावणकृतकर्मणां हेतवोऽपि उत्तरकाण्डगतकथाभ्यो विज्ञायन्ते।

रावणचरितगतानां सदोषांशानां प्रस्फुटीकरणमपि उत्तरकाण्डगतकथाभिः क्रियते। सीतां प्रति या मर्यादा रावणेन दर्शिता, सा रम्भां वेदवतीं च प्रति न दर्शिता (आभ्यां सह रावणेन हठसंभोगः कृतः); दुराचरणं न क्रियतामिति कुबेरेण प्रार्थितो रावणो दूतमुखेन; स च दूतो रावणेन निहतः।

(ख) केषुचित् पुराणेष्वपि रामस्य चरितमुपवर्णिवम्। शिष्टपालन-दुष्ट-दमनार्थं रामावतारेण कर्माणि विहितानि इत्येषु प्रदर्शितम्; भागवते, अग्निपुराणे च विशेषेण। पुराणगतं रावणचरितचित्रणं परस्पर-पृथक्-परम्परानुसारीति दृश्यते। शिवस्य विष्णोर्वा भक्तो रावण इति पुराणेषूक्तम्।

लङ्कावतारसूत्रे बुद्धानुयायिरूपेण रावणो वर्णितः। रावणो ब्राह्मणविरोधि-परम्परानुसारीति प्रथमतो दर्शितमत्र।

(१) पुराणे रावणो न बौद्धः, प्रत्युत शैवः। रावणं प्रति शिवस्य प्रसादोऽपि दर्शितो बहुधा; गुहाचित्रादिषु च प्रसादोऽयं चित्रितः।

रामेण शिवभक्तस्य रावणस्य वधः केन हेतुना शिवेन मृषित इति शिवपुराणतो विज्ञायते। अत्रोक्तं रावणचरितं न सर्वथा रामायणोक्तचरितानुसारि। बृहद्धर्म-पुराणे रावणो न केवलं शिवस्य प्रत्युत पार्वत्या अपि भक्तः, स्कन्दपुराणे तूक्तं यद् विष्णवतार-रामेण हतो रावणः शिवसारूप्यं प्राप शिवप्रसादात्।

(२) विष्णुपुराणे रावणो विष्णुभक्तरूपेणोक्तः। शिशुपालः पूर्वजन्मनि रावणो हिरण्यकशिपुश्चासीत्। इमे त्रयो हता विष्णोरवतारविशेषैः। द्रष्टव्यं चास्मिन्नर्थे भागवतम्।

जयविजययो रूपान्तरभूता हिरण्यकशिपु-रावणादय इति यद् भागवतीयं मतं तत् पद्मपुराणेऽपि दृश्यते। रामेण निहतो रावणो मोक्षं लब्धवानिति स्पष्टमुक्तमत्र।

अध्यात्मरामायणे जयविजयकथा लशेतोऽपि नास्ति, यद्यप्यत्र विष्णुपुराण-भागवतपुराणयोर्दृष्टिरुपलभ्यते। अत्यत्रं यद् रावणचरितं तद् अन्तरान्तरा रामायणोक्त-चरितेन सह संवदति; क्वचिच् चरितवर्णने यत् परिवर्तनं कृतं तस्यो-

ट्टेश्यं भक्तिमहिम-प्रदर्शनमिति विज्ञायते। वराहपुराणेऽपि वैष्णवरूपेण वर्णितो रावणः। रावणः शिवलिङ्गं लङ्कां निनायेत्यत्र उक्तम्। अत्र रावणो वराह-विष्णोरुपासकरूपेण चित्रितः।

(३) रामकृतो यः विश्रवःपुत्रस्य रावणस्य वधः स ब्रह्महत्यारूप इत्युक्तं स्कन्दपुराणे। अस्य ब्रह्महत्यारूपपापस्य प्रक्षालनार्थं रामो रामेश्वरलिङ्गं स्थापितवानित्यप्युक्तम्। एतल्लिङ्गमधिकृत्य न किमप्युक्तं वाल्मीकिना। अध्यात्म-रामायणे तूक्तमिदं सामान्येन। तमिलभाषीये कम्परामायणे एतल्लिङ्गप्रतिष्ठा विस्तरेणोपवर्णिता। ब्रह्महत्याप्रायश्चित्तार्थं लिङ्गस्य प्रतिष्ठा कृतेति नोक्तम् अध्यात्मरामायणे कम्परामायणे वा। राक्षसाः शिवपूजका इत्युद्घोषितं शिवपुराणे। अत्रेदं विज्ञेयं यद् वृत्रवधरूपकर्मणा ब्रह्महत्या कृता इन्द्रेण—इति प्राचीना कथास्ति ब्रह्महत्यानिदर्शनपरा।

(४) रावणचरिते उदात्तानि कर्माण्यपि लक्ष्यन्ते; यथा—तपश्चरणं सीतां प्रति समर्यादो व्यवहारश्च। अस्य व्यवहारस्य हेतुर्देवीभागवते दर्शितः।

विहित-प्रतिबद्ध-धर्माचारित्वं रावणे दृश्यते—इति स्वीकृत्यैव रावणचरितं विमर्शनीयम्।

## पद्मपुराणम् अहमदाबादनगरो च

## PADMPURĀṆA AND AHMEDABAD

PROF. R. N. MEHTA AND PROF. RASESH JAMINDAR

पद्मपुराणस्योत्तरखण्डे सन्ति साभ्रमतीनदीमाहात्म्यपरकाः केचनाध्यायाः (१३४–१७३), येषु साभ्रमती (=साबरमती)-नदी-संबद्धानां तीर्थानां विवरणं प्रदत्तम्, विशेषतश्च १५४–१५९ अध्यायेषु। अत्र खड्गधारेश्वर-दुग्धेश्वर-चन्द्रेश्वर-पिप्पलाद-पिच्चुमर्दन-कोटराक्षीति नामधेयानि तीर्थानि वर्णितानि विशदरूपेण।

खड्धारेश्वरतीर्थम् अहमदाबादसमीपे साभ्रमत्या वामतीरे साहिबबागक्षेत्रे विद्यते। इदमिदानीं लुप्तम्। किरातविशेषेण शिवप्रसादान्मोक्षोऽधिगतोऽत्र—इति कथात्रोक्ता। अत्रत्यानि कानिचन मन्दिराणि अष्टादशशताब्द्यां निर्मितानि। भीमनाथमन्दिरमत्र वर्तते। शैवसंप्रदायाध्युषितमिदं स्थानमिति विज्ञायते।

पुराणे या चण्डकथा उक्ता, तया ज्ञायते यदत्र किरात-भिल्लानां निवासोऽप्यासीदिति।

साभ्रमतीचन्द्रभागासंगमे दुग्धेश्वरस्य स्थितिरासीत्। इदानीमिदं लुप्तं जातम्। अस्य तीर्थस्य माहात्म्यप्रसंगे दधीचिचरितमुपवर्णितम्। दुग्ध—दधीति-वस्तु-द्वयस्य संबन्धो नामसादृश्यं च दधीचि-कथाया उद्भावके इति संभाव्यते। महात्मगान्धिप्रतिष्ठितस्याश्रमस्य समीपे वादनामको यो ग्रामः, तस्मिन् दुग्धेश्वरलिङ्गस्य स्थितिः।

पिप्पलादलिङ्गावस्थानं क्वेति न विज्ञायते। बह्वयः सत्याख्याः शिला विद्यन्ते चन्द्रेश्वरतीर्थे। साभ्रमतीनदीप्लावनेन काश्चन शिला भूमौ प्रोथिताः। प्लावनमपि तीर्थलोपे हेतुर्भवतीति निश्चप्रचम्।

पिचुमर्दनतीर्थस्य नामान्तरं निम्बार्कमिति। इदं सौरं तीर्थम्। बह्वयः सूर्यमूर्तयः अहमदाबादान्तर्गत-रायखण्डक्षेत्रे राजन्ते। द्विभुजधारिणी सूर्यमूर्तिरप्यत्र विद्यते। अत्रत्याः सूर्यमूर्तयः ८।९ शताब्दीत आरभ्य १२।१३ शताब्दीं यावद् विनिर्मिता इत्यनुमीयते।

कोटराक्षीदेवी कृष्णार्जुनाम्यां साभ्रमतीतीरे प्रतिष्ठिता—इत्युक्तमत्र। मूर्तिरियं सप्तर्षि–अरा–क्षेत्रे विद्यते। महिषमर्दिनीमूर्तिरप्यत्रास्ति। अत्र दशनामिसंप्रदायस्य प्रामुख्यमवलोक्यते सप्तदशशताब्दीत आरभ्य। शैववैष्णवसंप्रदाययोरप्यत्र विद्यमानता। कोटरस्थितत्वाद् देवी कोटराक्षीत्युच्यते।

पुराणविवरणत इदं प्रतीयते यत् कानिचन तीर्थानि अद्यापि विराजन्ते, कानिचन पुनर्लुप्तानि जातानि; केषाञ्चिच्च च पुनरुद्धारः कृतः।

पुराणोक्ततीर्थविवरणाध्ययनेन पुराणरचनाकालोऽपि अनुमातुं शक्यते। एतद्विषये विण्टरनिट्जमतमत्रोद्धृतम्। लिङ्गादीनां प्राचीनता कीदृशीति निरूपयितुं शक्यते ऐतिहासिकपद्धत्या; ततश्च लिङ्गादिमाहात्म्यविवरणपरकाणां पुराणानां रचनाकालो ऽप्यनुमातुं शक्यते। पद्मपुराणान्तर्गत—साभ्रमतीमाहात्म्यपरका अध्यायाः १४–१५ शताब्दीमध्ये विरचिता इत्युक्तमन्ते लेखकेन।

# अथर्ववेदोपवेद-विषयकस्य भागवतपुराणमतस्य हेतुः

## REASON FOR THE BHĀGAVATA VIEW ABOUT THE UPAVEDA OF THE ATHARVAVEDA

RAM SHANKAR BHATTACHARYA

चतुर्णां वेदानामुपवेदा भागवते एव नामतो निर्दिष्टाः ( ३।१२।३७-३८); अत्र अथर्ववेदस्योपवेदः स्थापत्यमित्युक्तम् । ( यद्यपि भागवते उपवेदशब्दो न प्रयुक्तस्तथापि शास्त्रविशेषाणामुपवेदतां भागवतकारेण विज्ञातमेवेति नास्ति संशयः ) ।

भागवतस्य मतमिदं न शास्त्रान्तरानुमतम् । अथर्ववेदस्योपवेदः 'अर्थशास्त्रम्', इत्याह चरणव्यूहकारः, देवीपुराणकारः, प्रस्थानभेदकारश्च । 'अस्त्रशास्त्रं' खलु अथर्ववेदस्योपवेद इत्युक्तं चरणव्यूहशाखान्तरे ।

भागवतमतस्य किं मूलमिति जायते विचारणा । अथर्ववेदस्य संबन्धः 'अर्थशास्त्रेण' सहास्तीति नापलपितुं शक्यते । दृष्टयन्तरमाश्रित्य भागवतकारेण स्वमतं प्रख्यापितम् इति व्यक्तं प्रतीयते । तथाहि—भागवतं पञ्चरात्रागमप्रतिष्ठितम् । आगमेऽस्मिन् स्थापत्यस्य ( मन्दिरविग्रहादिनिर्माणपरायणस्य ) प्रामुख्येन विवरणम् आस्ते—इति दृश्यते; अतो भागवतकारेण स्थापत्यस्यैव उल्लेखः कृतः । स्थापत्य-शास्त्रम् अथर्ववेदस्यैवोपवेदो भवितुमर्हति । किं च स्थापत्यविद्यया सह भगवतः कृष्णस्य नेदिष्ठः संबन्ध आसीदिति इतिहासपुराणत एव विज्ञायते । अतः कृष्णभक्तिपरायणेन भागवतकारेण स्थापत्यस्योल्लेखः कृत इत्यनुमीयते ।

आयुर्वेदः खलु अथर्ववेदस्य उपाङ्गम् इति आयुर्वेदविदः । आयुर्वेदस्याथर्ववेदेन सह संबन्धोऽन्तरङ्ग इति प्रसिद्धमेव । एवं सत्यपि आयुर्वेदशास्त्रीयमतेन सह भागवतकारस्य न विरोधः, यत आयुर्वेदशास्त्रे आयुर्वेदस्य उपाङ्गत्वमुक्तम् अथर्ववेदस्य, न पुनरुपवेदत्वम्; भागवते खलु उपवेदानां निर्देशः कृतो नोपाङ्गानाम् । न खलु उपवेद एवोपाङ्गम् । उपाङ्गगणनापि नात्यन्तं व्यवस्थितेति ।

# पुराणग्रन्थ-समीक्षात्मकसंपादनाभिनवपद्धतिविषये काचिद् विचारणा

## CONSIDERATIONS ON A NEW METHOD OF CRITICALLY EDITING THE PURĀṆAS

GIORGIO BONAZOLI

यतः प्रत्येकं पुराणानां शाखभेदबाहुल्यं दृश्यते, अतः पुराणप्रकृत्यनुरूपमेव पुराणसंपादनं विधेयमिति युक्तम् ।

पुराणानां पाठा हस्तलेखनिबद्धाः, परम्परानिबद्धाश्च । पुराणानां पाठे सर्वत्र ऐकमत्यं नास्ति, देशभेदव्यवस्थिता अपि पाठभेदा भवन्ति--इति प्रत्यक्षतो दृश्यते । इमे पाठभेदा अपि न सदैव एकरूपेण विद्यन्ते, प्रत्युत यथाकालं भिद्यन्ते । एषां पाठभेदानां प्रामाण्यं स्वीकृत्यैव पुराणानां संपादनं करणीयमिति न्याय्या दृष्टिः ।

उपर्युक्तां दृष्टिमवलम्ब्य गरुडपुराणीयप्रेतकल्पस्य संपादनं विहितम्, यस्य पञ्चमोऽध्याय इह उदाहरणरूपेण प्रकाश्यते । सर्वेषां पाठसंप्रदायानां संग्राहिका इयम् अभिनवा सम्पादन-पद्धतिः । प्रेतकल्पीयानां सर्वासां शाखानां प्रामाण्यमाश्रित्येदं संपादनं कृतम् । प्रत्येकं शाखानां हस्तलेखा बहवो वा भवेयुः स्वल्पा वा—शाखानां प्रामाण्यं तु समानमेव ।

प्रेतकल्पीय-पञ्चमाध्यायस्य संपादने देवनागरीलिपिहस्तलेखानामेव उपयोगः कृतः प्रामुख्येन; एकस्य मैथिलीलिपिहस्तलेखस्य, वङ्गीयलिपिहस्तलेखस्य च । एभिर्हस्तलेखैः प्रेतकल्पपाठपरम्परा कृत्स्नशो ज्ञातुं शक्यते; कस्मिन् देशे का पाठशाखा चोद्भूता—इत्यपि च ।

पाठान्तराणां विचारणया पाठानां प्राचीनता, अतिप्राचीनता, अर्वाचीनता च निश्चेतुं शक्यते । पुराणपाठप्राचीनतादीनां प्रदर्शनाय सीसकाक्षरप्रयोगे भेदः करणीयः, येन पाठानां प्राचीनता अर्वाचीनता वा आञ्जस्येन विज्ञाता भवेत् पाठकैः । कथं पाठान्तराणि जातानि, एकं पाठान्तरं कथं पाठान्तरमन्यज् जनयति —इत्यादिकं सर्वम् अस्मत्-संपादित-प्रेतकल्पाध्ययनेन ज्ञातं भवितुमर्हति । दोषबहुला हस्तलेखा अपि तथैव उपादेया यथा निर्दोषाः—इत्यस्मदीया दृष्टिः ।

एकस्याः पुराणपाठ-शाखाया बहुहस्तलेखयुक्ताया आधारेण यत् संपादनं क्रियते, न तत् सुष्ठु (तस्याः शाखाया अतिप्राचीनत्वे सत्यपि) । अत एव शाखाविशेषाधारेण संपादितानि प्रचलितानि पुराणानि न शुद्धानीति मन्तव्यम् । प्राचीनकालादेव प्रत्येकं पुराणानि बहुधा विभक्तानि; पुराणग्रन्थस्य बहुशाखावत्ता

पुराणस्वभावसिद्धेति अस्माकं मतम् । कस्यापि पुराणस्य किमपि आदिमं रूपमासीत्, तत्स्वरूपनिरूपणं पुराणसंपादनकार्यस्य लक्ष्यमिति नास्माभिरभ्युपगम्यते। पाठान्तराणां पुराण-पाठशाखानां च परस्परसंबन्धप्रदर्शनम् ( कः पाठः कस्मात् पाठाद् उद्भूत इत्यादिविचाररूपम् ) खल्वस्मत्-संपादनस्य लक्ष्यभूतम् । प्राचीनतमः पाठः क इत्यत्र नास्माक माग्रहः । यः पाठो बहुसंमतः स एवात्र बृहत्सीसकाक्षरेण मुद्रयते । प्रचलितायाः पाठसमीक्षितसंपादनपद्धतेः सम्यग् वर्जनं नास्माकमभीष्टम् । अस्मदीयां ग्रन्थसंपादनपद्धतिं सुकथनकरोऽप्यनुगृह्णाति ।

पाठसमीक्षितेतिहास-पुराणसंस्करणानि यान्यद्य प्रचलितानि तानि खलु अप्रामाणिकानीति मन्यन्ते केचन गवेषकविद्वांसः, संस्कृतपण्डिताश्च । अस्मत्-संमतायां पद्धतौ नायं दोष आपतति । येन यः पाठः प्रामाणिकत्वेनाभ्युपगतः, स तं पाठमत्रापि द्रष्टुं शक्नुयात् । अस्मत्पद्धतिसंपादितानि पुराणानि सर्वैः पुराण-शाखासंप्रदायैः प्रामाणिकत्वेन स्वीकरणीयानि भवेयुः । पुराणविशेषस्य कृत्स्ना परम्परा अस्मद्रीतिसंपादिते पुराणे प्रतिबिम्बिता भवति ।

अस्मत्पद्धत्या संपादितः प्रेतकल्पीयः पञ्चमोऽध्यायः परिशिष्टे मुद्रितः । एतद्-विषये विज्ञेयं यद् अस्मिन्नध्याये प्रतिपादिता विषयाः ( मृत्योः प्राक् पश्चाच्च अनुष्ठेयानि कर्माणि ) गरुडपुराणीये सारोद्धारे, नौनिधिरामकृते सारोद्धारे च दृश्यन्ते । एतत्संपादने व्यवहृता हस्तलेखा श्चतुर्धा विभक्ताः; प्रत्येकं वर्गेषु क-ख-ग-घ-संज्ञकेषु ४, ४, १, २ हस्तलेखाः । पुराणाधारेण विरचिताश्चत्वारो ग्रन्था अपि व्यवहृताः ।

निबन्धलेखकेन प्रत्येकं हस्तलेखानां स्वरूपं तेषां परस्परसंबन्धश्च ( को हस्तलेखः केन कियतांशेन प्रभावित इत्येवंरूपः ) विस्तरेणोक्तं । निबन्धान्ते परिशिष्टरूपेण प्रेतकल्पीयः पञ्चमोऽध्यायो नवीनपद्धत्या संपादितः सन् मुद्रितः; स तत्रैव द्रष्टव्यः ।

# सर्वभारतीय-काशिराजन्यासस्य कार्यविवरणम्

( जनवरी—जून १९८५ )

## गरुडपुराणकार्यम्

अस्मिन् कार्यावधौ गरुडपुराणस्याचारकाण्डस्य एकस्य वङ्गलिपिहस्तलेखस्य पाठसंवादकार्यं क्रियमाणं वर्तते, शीघ्रमेव समाप्तिमेष्यति। प्राच्यविद्यासंस्थानस्य बड़ोदानगरस्थस्य प्रेतकल्पस्य द्वयोः हस्तलेखयोः पाठसंवादकार्यमपि प्रारब्धं समाप्तिं च गतम्। गरुडपुराणस्य अन्यपुराणैः रामायणमहाभारताभ्यां च सह विषयसम्वादकार्यमपि क्रियमाणं वर्तते।

## मानसखण्डकार्यम्

स्कन्दपुराणान्तर्गतस्य मानसखण्डस्य सम्पादनकार्यमपि प्रचलति। 'पुराणम्'-पत्रिकाया अस्मिन् अङ्के अग्रिमा दशाध्यायाः ( २१—३० ) मुद्रिता वर्तन्ते। इत्थं त्रिंशदध्यायाः प्रकाशिता जाताः।

## शिवधर्मोत्तरपुराणकार्यम्

शिवधर्मोत्तरपुराणस्य केचन हस्तलेखा दक्षिणभारतस्थितहस्तलेखागारेभ्यः प्राप्ताः, येषां पाठसंवादकार्यं शीघ्रमेव प्रचरिष्यति। अस्य सम्पादकः डा० बोनाजुली महाभागः अप्रैलमासे रोमनगरं गतः। स तत्र अस्य पाठसंवादकार्ये सम्पादनकार्ये च 'कम्प्यूटर'-यन्त्रस्य उपयोगिताया अध्ययनं करिष्यति। अमेरिकादेशस्य विस्कान्सिनविश्वविद्यालये अगस्त ८५ मासे समाहूते पुराणसम्मेलने अपि बोनाजुली-महाशयः सम्मिलितो भविष्यति।

## वेदपारायणम्

माघमासस्य शुक्ले पक्षे समग्रायाः कृष्णयजुर्वेदतैत्तिरीयशाखायाः संहिता-ब्राह्मणोपनिषद्भिश्च सह कण्ठस्थपारायणं रामनगरदुर्गस्थिते व्यासेश्वरमन्दिरे श्री वी. देन्दुकूरि वेङ्कटसुब्रह्मण्यसोमयाजिमहोदयेन कृतम्। वेदमूर्ति श्रीगणेशभट्ट-बापटमहाभागः श्रोता आसीत्। पारायणसमाप्तौ पारायणस्य कर्त्रे श्रोत्रे च यथानिर्दिष्टा दक्षिणा मार्गव्यय-भोजनादिकं च प्रदत्तम्।

## पुराणविभागे आगताः विद्वांसः

अस्मिन् कार्यावधौ अधोनिर्दिष्टा विद्वांसः पुराणविभागे आगताः—

१. डा० गयाचरणत्रिपाठिमहाभागः ( प्रयागनगरस्थस्य गङ्गानाथ झा

केन्द्रीयविद्यापीठस्य प्राचार्यः ) १५-२-८५ दिनाङ्के। एष महाभागो दर्शक-पुस्तिकायां लिखति—पुराणेषु निहिताया अस्मत्परम्पराया वैज्ञानिकव्याख्यान-विषये सर्वभारतीयकासिराजन्यासस्य पुण्यविभागः आवश्यकीं सेवां विदधाति। विदुषां वैदुष्येन तेषां पाठसम्पादने सूक्ष्मेक्षिकयाऽवधानतया च तेषां पुराण-संस्करणानि प्रामाणिकानि विश्वासार्हाणि च सन्ति। अहं तेषां पाठसंवादपद्धतिं निरीक्षितवान्, तां त्रुटिविरहितां च प्राप्तवान्। पुराणविभागस्य कार्यकर्तारः कुशाग्रबुद्धयः, सौहार्दयुताः, सहयोगपराश्च सन्ति। सम्पूर्णं मण्डलं काशिराजस्य गरिम्णा महिम्ना चाभिभूतं वर्तते। इदं एतादृशमेकं स्थानं यत्र जना आत्म-प्रचारविरहिता निःस्वार्थज्ञानार्जने संलग्नाः सन्ति। अहं सर्वथा साफल्य-कामोऽस्मि।

२. थाईदेशतः पञ्चाशद्विदुषां भिक्षूणां च समूहः ( १ मार्च ८५ दिनांके ) पुराणविभागे आगतः। अस्य नेतृत्वं 'सियामसोसाइटी'संस्थायाः सम्मानितः सदस्यः श्री फा राजवरमुनिः चकार। एष समूहः न्यासाध्यक्षैरस्तत्रभवद्भिः काशिनरेशैः सह मिलितवान् तथा बौद्धाध्यनसम्बद्धविविधसांस्कृतिकशैक्षणिकसमस्यानां विषये विमर्शं कृतवान् च। तथा उभयोर्देशयोः सांस्कृतिकपरम्परयोः पारस्परिकसहयोगविषये विमर्शं कृतवान्। तत्रभवन्तः काशिनरेशाः यात्रायाः प्रशंसनार्थं 'पुराणम्'पत्रिकाया एकां प्रतिं प्रदत्तवन्तः। श्रीराजवरमुनिः दर्शकपुस्तिकायां लिखति—

अस्माकमिदमत्यन्तहर्षविषयः महत्त्वविषयश्चासीत् यद् वयं तत्रभवन्तं काशिनरेशं मिलितवन्तः, तत्र भवतः संग्रहालयस्य अवलोकनस्यावसरं च प्राप्त-वन्तः। वयं तत्रभवतः शिक्षाविषये महतो योगदानस्यापि महतीं प्रशंसां कुर्मः।

३. डा० रामकरणशर्ममहोदयः—सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिः १३ जून १९८५ दिनाङ्के।

४. उत्तरप्रदेशस्य राज्यपालो महामहिम श्री चन्द्रेश्वरप्रसाद नारायणसिंह महोदयः स्वकार्यभारसमाप्त्यवसरे मार्च १९८५ मासस्य अन्तिम चरणे वाराणसी-मागतः। तत्रभवन्तः काशिनरेशा राज्यपालमहोदयस्य सम्माने नन्देश्वर-भवने एकम् अल्पाहारं प्रदत्तवन्तः, यस्मिन् नगरस्य शिक्षाविदोऽधिकारिणश्च आहूता आसन्। अस्मिन् अवसरे न्यासाध्यक्षैस्तत्रभवद्भिः काशिनरेशैः राज्यपालमहोदयाय वराहपुराणस्य हिन्दीभाषानुवादस्य एका प्रतिः उपहारीकृता।

## डा० हाजरा-स्मारकग्रन्थस्य प्रकाशनम्

कीर्तिशेषेण डा० राजेन्द्रचन्द्रहाजरामहोदयेन पुराणाध्ययनानुसंधानविषये कृताया महत्या सेवायाः स्मरणार्थं विविधपत्रिकासु प्रकाशितानां तस्य लेखानां स्मारकग्रन्थरूपेण प्रकाशनस्य निश्चयो न्यासेन कृतः। 'पुराणम्'पत्रिकाया जनवरी

१९८५ अंकः (२७.१) स्मारकरूपेण प्रकाशितो जातः, यत्र हाजरामहोदयस्य विशिष्टपौराणिकलेखानामेव संग्रहो वर्तते। तस्य अन्येषां विषयाणां पौराणिकानां च लेखानां संग्रहः हाजरास्मारकग्रन्थरूपेण पृथक् क्रियमाणो वर्तते। अयं ग्रन्थः भागद्वयात्मको भविष्यति। प्रथमे भागे पौराणिकानां वैदिकानां च लेखानां संग्रहो भविष्यति, द्वितीये च भागे काव्यार्थशास्त्रधर्मशास्त्रादिविषयाणां लेखा भविष्यन्ति। डा० हाजरा-महोदयस्य दुहिता श्रीमती जयन्ती विश्वासमहोदया स्वपितुः स्मारकग्रन्थस्य प्रकाशने विशेषोत्साहं प्रदर्शितवती तथा लेखानामनुमुद्रणप्रतयः प्रदत्तवती। एषु वहवो लेखाः डा० हाजरामहोदयेन स्वयमेव संशोधिताः सन्ति।

### प्रधानमन्त्रिणः श्रीराजीवगान्धीमहोदयस्य वाराणस्यामागमनम्

प्रधानमन्त्री श्रीराजीवगान्धीमहोदयः लोकसभासदस्यचयनावसरे १ दिसम्बर १९८४ दिनाङ्के वाराणसीमागतः। न्यासाध्यक्षास्तत्रभवन्तः काशिनरेशा वाबतपुरस्थाने तस्य स्वागतं चक्रुः।

विधानसभामतदानावसरे २६ फरवरी १९८५ दिनांके विविधक्षेत्राणां प्रचारानन्तरं प्रधानमन्त्रिमहोदयः वाबतपुरस्थाने वायुयानेन दिल्लीं गतः। तत्र महाराजैस्तस्य सौप्रस्थानिकाभिनन्दनं कृतम्।

### श्रीकाशीविश्वनाथन्यासः

४ जून १९८५ दिनाङ्के श्रीकाशीविश्वनाथमन्दिरस्य न्यासधारिणां सभा तत्रभवतां काशिनरेशाणामध्यक्षतायां नन्देश्वरप्रासादे संपन्ना। सभानन्तरं न्यासाध्यक्षैः काशिनरेशैः सदस्येभ्यो भोजनं प्रदत्तम्।

## सहयोगिन्यासानां कार्यविवरणम्

### महाराज-बनारस-विद्यामन्दिर-न्यासः

#### वसन्तमङ्गलोत्सवः

पूर्ववर्षानुसारतः अस्मिन्नपि वर्षे 'होली' पर्वानन्तरं प्रथमभौमवारमारभ्य न्यासेन वसन्तमङ्गलोत्सवः समायोजित आसीत्। एष उत्सवः १२ मार्च १९८५ दिनाङ्कमारभ्य १४ मार्च १९८५ दिनाङ्कं यावत् दिवसत्रयात्मकः सम्पन्नः।

प्रथमयोर्द्वयोर्द्दिवसयोः शास्त्रीयसंगीतस्य कण्ठसंगीतः वाद्यसंगीतश्च प्रदर्शितौ आस्ताम्। कलाकाराः काशिकहिन्दूविश्वविद्यालस्य संगीतसंकायत आगता आसन् येषु वरिष्ठछात्रा अपि संमिलिताः बभूवुः। उत्सवे न्यासस्याध्यक्षास्तत्रभवन्त काशिनरेशा राजपरिवारसदस्याश्च प्रतिदिनमुपस्थिता आसन्। विशिष्टा जना जनपदस्य अधिकारिणोऽपि मङ्गलोत्सवे उपस्थिता आसन्।

## संग्रहालयः

महाराज-बनारस-विद्यामन्दिरन्यासेन संचालितः संग्रहालयः वर्षाणि यावत् समग्रदेशतः भारतीयान् वैदेशिकान् च दर्शकान् आकर्षति। संग्रहालये विविधशिविकानां हस्त्याभरणानाम् अम्वारी इत्यादिविविधवरण्डकानां वस्त्राणां, चारुप्रस्तरस्य कलानिर्मितीनां सप्तदशशताब्द्याः अनन्तरं विविधकालक्रमस्य शस्त्राणां, काशिराजस्य कलाकारैः निर्मितानां हस्तिदन्तकलाकृतीनां क्षेत्रीय प्राकृतिकेतिहासस्य लघुसंग्रहस्य, प्रथिताया धर्मघटिकायाश्च संग्रहः यूनां वयस्कानां च हृदयानि समानमेव आकर्षति। दूरस्थितानां समीपवर्तिनाञ्च विद्यालयानां छात्रेभ्यश्छात्राभ्यश्च समानमेव एष संग्रहालयः सत्वरं शिक्षायाः साधनभूतो भवति। विशिष्टा दर्शकाः संग्रहालयं दृष्टवन्तो येषां केचन संग्रहालये रक्षितायां दर्शकपुस्तिकायां स्वाभिमतान्यपि लिखितवन्तः। थाईलैण्ड इतिदेशस्य फ्रा राजवर मुनिः भिक्षुभिः सह संग्रहालयं तत्रभवतः काशिनरेशाञ्च दृष्टवान् सः स्वमतं थाईलिप्यां लिखितवान्। मैडम कैथरीन क्लेमेण्ट महोदया-फ्रान्सदेशे समायोजिते भारतमहोत्सवे प्रधानसचिवपदं निर्वहन्ती दर्शकपुस्तिकायां लिखति-एतादृशोऽयं यः प्रगाढस्मृतिं करोति। अस्मिन् चारुसंग्रहालये अतिप्राचीना कथा निबद्धाऽस्ति तत्रभवतः काशिनरेशान् प्रति धन्यवादाः।

## ध्रुपदमेला

अस्मिन् वर्षे ध्रुपदमेलाया एकादशतमउत्सवः सम्पन्नः। पूर्ववत् एष उत्सवः त्रिदिवसात्मक आसीत् यस्य समाप्तिर्महाशिवरात्रिदिने जाता। एष कार्यक्रमः त्रिषु दिवसेषु रात्रिं यावद् प्रचरति। मेलायाः उद्घाटनं महाराजकुमारेण श्री अनन्तनारायणसिंहमहोदयेन कृतम्। समग्रदेशतः विशिष्टा ध्रुपदगायकाः मेलायां सम्मिलिता बभूवुः। विगतवर्षादेवत्रयाणां पुरस्काराणाम् अत्र घोषणा भवति। द्वौ पुरस्कारौ ध्रुपदगायकयोः, एकः पुरस्कारः 'पखावज' इत्यस्य वीणाया वा वादकाय प्रदीयते। त्रावनकोर-राज्यस्य तत्रभवान् चित्रतिरुनाल बाल रामवर्म महोदयः लक्षरूप्यकाणां राशिम्, एषां पुरस्काराणां कृते प्रदत्तवान्। इमे पुरस्कारा महाराजस्य पूर्वपुरुषस्य महतो संगीतज्ञस्य स्वातितिरुनालमहाभागस्य नाम्ना दास्यन्ते। स्वातितरुनालमहाभागः संगीतस्य कर्णाटशैल्या महान् संगीतकार आसीत् तथा

कर्णाटशैल्याः प्रथितानां संगीतकाराणां त्यागराज-दीक्षितार-श्यामशास्त्रि-महाभागानां समकालिक आसीत्। महाराज स्वातितिरुनालमहोदयः हिन्दुस्तानी-संगीतकारः विशेषतो ध्रुपदपद्धत्या अपि आसीत् तथा यथा महाराजकुमारेण उद्घाटनभाषणे भणितम् महाराज स्वातितिरुनालमहोदस्य नाम्नः ध्रुपदमेलापकेन संबन्धः राष्ट्रीयैक्यस्य भावनां दृढो करिष्यति। पूर्ववत् मेलाया व्यवस्था संकटमोचनमन्दिरस्य 'संकटमोचनफाउण्डेसन' इत्यस्य च प्रधानेन प्रो० वीरभद्र-मिश्रमहोदयेन कृता। मेला सदैव गङ्गाकूले तुलसीघट्टे तुलसीमन्दिरप्राङ्गणे संपाद्यते। ध्रुपदमेलायाः निमित्तं नयीदिल्लीस्थिता संगीतनाटक एकडेमी संस्था पञ्च सहस्ररूप्यकाणां उत्तरप्रदेश-संगीत-अकादमी द्विसहस्ररूप्यकाणां च अनुदानं प्रदत्तवत्यौ।

## महाराज-उदितनारायणसिंह-मानसप्रचारनिधिः

वैशाखमासस्य शुक्लपक्षे प्रतिपत्तिथिमारभ्य नवमीं तिथिं यावत् (अप्रैल २०-३०, १९८५) रामचरितमानसस्य नवाह्पारायणं चकिया नगरस्थे काली-मन्दिरे संपन्नम्। नवसु दिवसेषु सायंकाले रामचरितमानसविषये प्रथितैः व्यासैः प्रवचनं कृतम्। द्वयोः दिनयोः मानसरत्नस्य श्रीनाथमिश्रस्य प्रवचनं जातम्। भक्तश्रोतॄणां संख्या विपुला आसीत्। तत्रभवन्तः काशिनरेशाः महाराजविभूति-नारायणसिंहमहोदयाः, विशिष्टा नागरिका, तत्रस्था शासनपदाधिकारिणश्च प्रतिदिनं कथाश्रवणं चक्रुः। ३० अप्रैल ८५ दिनाङ्के कथासमाप्तौ होमस्य भोजनस्य (भण्डारा इत्यस्य) च आयोजनं जातम्। रामचरितमानसस्य पारायणं कथा च अनुदितं लोकाकर्षकं भवति। चकियानगरस्य समीपवर्तिक्षेत्रस्य जनानां वृद्धिर्जायते कथायाम्।

## महाराजकाशिराजधर्मकार्यनिधिः

अयं न्यासः पूर्वपरम्परातः संचालितानां विविधानां धार्मिककृत्यानां वर्षं यावत् सम्पादनं करोति त्रयाणां शिक्षासंस्थानानां सञ्चालमपि करोति। इमानि शिक्षासंस्थानानि सन्ति—गङ्गापुरस्थः महाराज बलवन्तसिंह महाविद्यालयः, राजातालाब नगरस्थः महाराज मनसारामविधिविद्यालयः (सम्प्रति महाराज बलवन्तसिंह महाविद्यालयस्याङ्गभूतः) तथा रामनगरस्थिता महारानी रामरत्न कुँवरि संस्कृतपाठशाला। इमानि शिक्षासंस्थानानि प्रवर्धमानानि सन्ति शिक्षाफलं च सन्तोषार्हं वर्तते।

## २१

धन्वन्तरिरुवाच ।

सरोवरस्य माहात्म्यं कथितं योगिसत्तम ।
सर्वपापप्रशमनं सर्वकामार्थदं शुभम् ॥ १ ॥

अधुना श्रोतुमिच्छामि खण्डाख्यानं सुविस्तृतम् ।
तथा खण्डप्रमाणं च श्रोतुमिच्छाम्यसंशयम् ॥ २ ॥

दत्त उवाच ।

शृणुष्व नृपशार्दूल प्रमाणं चातिविस्तृतम् ।
यथा प्रमाणं तत्वेन कथयामि न संशयः ॥ ३ ॥

नन्दपर्वतमारभ्य यावत् काकगिरिः स्मृतः ।
तावद् वै मानसः खण्डः ख्यायते नृपसत्तम ॥ ४ ॥

आकरैर्बहुभिर्युक्तो नदीभिः समलंकृतः ।
तस्मिन् खण्डे महाभाग प्रवाहा बहवः स्मृताः ।
तस्मिंस्तु बहवो राजन्नाकरा बहवः स्मृताः ॥ ५ ॥

तत्र ये मानवाः सन्ति प्राणिनोऽपि सुसंयताः ।
ते सर्वे मानवानां वै प्रपूज्या नात्र संशयः ॥ ६ ॥

राजोवाच ।

गिरीणां नामधेयं वै श्रोतुमिच्छामि तत्त्वतः ।
येषु नद्यः समुद्भूताः मानसोत्था न संशयः ॥ ७ ॥

दत्त उवाच ।

नामधेयं महाराज पर्वतानां शृणुष्व वै ।
शंकरस्यात्मभूतानां पूजितानां न संशयः ॥ ८ ॥

---

२१

१. –b) ने1 °सत्तमः (→°सत्तम). २. –d) ने1 श्रोतुमिच्छामि तत्त्वतः. ४. –c) ने1 खण्डे (→खण्डः) ५. –a) ने1 आकारैर् (→आकरैर्). ६. –b) ने1 प्राणिनो ये सुवन्त्रिताः, ने2 प्राणिनो वसुसंयता. ७. –c) ने1 नवः, ने2 नयः (→नद्यः).

❀ ने1. ⊙.

८. ने1. ⊙.

नाम्ना नन्दगिरिः पुण्यो यत्र नन्दा महेश्वरी ॥ ९ ॥
ततो मानसखण्डे वै पुण्यो द्रोणगिरिः स्मृतः ।
महौषधिसमाकीर्णः सिद्धगन्धर्वसेवितः ॥ १० ॥
ततः पुण्यो महाभाग विद्यते दारुकाननः ।
यत्र योगीश्वरो देवः पूज्यते नात्र संशयः ॥ ११ ॥
परं कूर्माचलो नाम पर्वतः ख्यायते भुवि ।
यत्र वै मानसस्यान्तं वदन्ति मुनयः शुभाः ॥ १२ ॥
ततो नागपुरो नाम पर्वंतो नृपसत्तम ।
यत्र संपूज्यते नागा वासुकीप्रमुखादयः ॥ १३ ॥
ततो दारुगिरिः पुण्यः पूज्यते नृपसत्तम ।
यत्र संपूज्यते देवः पातालभुवनेश्वरः ॥ १४ ॥
ततस्तु पावनो नाम पर्वंतः सिद्धसेवितः ।
यत्र संपूज्यते देवः पावनो लोकपावनः ॥ १५ ॥
ततः पञ्चशिरो नाम पर्वतः सुरराडिव ।
राजते नृपशार्दूल साक्षादिव शतक्रतुः ॥
तस्मिन् शिरांसि देवस्य विराजन्ते न संशयः ॥ १६ ॥
ततस्तु केतुमान् नाम पर्वतो नृपसत्तम ।
यत्र संपूज्यते देवः केतुमान् नाम नामतः ॥
मालिकार्जुनसंज्ञो वै तत्रैव किल पूज्यते ॥ १७ ॥
गणनाथेति विख्यातः पर्वंतस्तदनन्तरम् ॥
तत्र संपूज्यते राजन् गणनाथो न संशयः ॥ १८ ॥
तत्र दुन्दुकरो नाम पर्वंतो नृपसत्तम ।
ततस्तु चन्द्रमा नाम पर्वतो नृपसत्तम ॥
तत्र संपूज्यते देवी सुषमा नाम नामतः ॥ १९ ॥

---

९. –b) ने1.3 महेश्वरि (→महेश्वरी). ११. –c) ने1.3 देवो (→देवः). १३.–d) ने1 वासुकि° (→वासुकी°). १४. –a) ने1 °गिरी (→°गिरिः). –c) ने1 देव– (→देवः). १५. –c) ने1 देव–(→देवः). –d) ने1 नाम (→लोक–). १७. –b) ने1.2 °सत्तमः (→°सत्तम). –e) ने1.2 °नामा (→°संज्ञो); १७ श्लोकात्परं ने2 अधिकम्—पर्व तत् सुरसेवितः । मालिकार्जनसंजी वै (?). १८. –a) ने1 गङ्गा° (→गण°). १९. –a) ने1 दुन्दुकरे (→दुन्दुकरो). –f) ने1 सुखमा (→सुषमा).

ततो वतावरो नाम पर्वतः सिद्धसेवितः ।
यत्र वै शतलिङ्गाख्यो देवः संपूज्यते हरः ॥ २० ॥

ततस्तु सुमहापुण्या मालिकाख्या सुशोभना ।
यत्र देव्याः पुरी पञ्च पूज्यन्ते त्रिदशैरपि ॥ २१ ॥

ततस्तु काकनामा वै पर्वतः समुदाहृतः ।
चक्रपाणेः पदं यत्र पूज्यते नृपसत्तम ॥ २२ ॥

ततो जलाशयो नाम पर्वतः समुदाहृतः ।
यत्र संपूज्यते राजन् देवो जालन्धराह्वयः ॥ २३ ॥

ततः स्कन्दगिरिः पुण्योः देवगन्धर्वपूजितः ।
यत्र रुद्रस्य तनयः पूज्यते त्रिदशैरपि ॥ २४ ॥

ततस्तु त्रिपुरो नाम गिरिर्वै समुदाहृतः ।
तत्र वै पूज्यते देवी त्रिपुरा देवपूजिता ॥ २५ ॥

ततो गौरीगिरिः पुण्यः शिवाशतनिनादितः ।
यत्र संपूज्यते देवी गह्वरे गिरिकन्यका ॥ २६ ॥

ततो नागगिरिः पुण्यस्ततः काकगिरिः स्मृतः ।
तत्र संपूज्यते काली भवानी लोकसाक्षिणी ॥ २७ ॥

एते वै गिरयः पुण्या मया ते समुदाहृताः ।
सुपुण्यैर्यैर्महाभाग हिमाद्रिः परिवेष्टितः ॥
येषां संश्रवणात् सद्यो मुक्तिमार्गं प्रलभ्यते ॥ २८ ॥

तत्र गच्छ महीपाल मृत्युस्ते विनशिष्यति ।
तत्र गत्वा स्वधाभागं प्राप्स्यसि नात्र संशयः ॥ २९ ॥

व्यास उवाच ।

इति तस्य ऋषेर्वाक्यं श्रुत्वा काशिपतिस्तदा ।
मत्वा देवमयं पुण्यं हिमाद्रिमृषिसत्तमाः ॥ ३० ॥

---

२०. –a) ने1 देवतये (→वतावरो). –b) ने3 °सेवितं (→°सेवितः).
२१. –b) ने1 मालिकासु (→मालिकाख्या). –c) ने2.3 देव्यः (→देव्याः). –d) ने1.2 पूज्यते (→पूज्यन्ते). २२. –d) ने1 °सत्तमः (→°सत्तम).
२३. –a) ने1 जलाशये (→जलाशयो). २५. –c) ने3 देवि (→देवी).
२६. –a) ने2 गौरी° (→गौरि°); ने3 ततो देवीगिरिं पुण्यम्. २७. –a) ने2 पुण्यास् (→पुण्यस्). २८. –e) ने3 एषां (→येषां). –f) ने2 °मार्ग–(→°मार्गं).
३०. –c) ने2 नत्वा (→मत्वा).

विहाय राज्यं सकलं सलक्ष्मीं
विहाय पुत्रानपि वै कलत्रान् ॥
ययौ हिमाद्रिप्रमुखे स राजा
स्वमुक्तिमीप्संस्त्रिदशाधिपो यथा ॥ ३१ ॥

व्रजन्तं तं तदा विप्रा राजानं दशमे पदे।
हिमाद्रिकथया पूतमवतीर्णं भुवःस्थले ॥
प्रतिजग्मुः सुराः सर्वे विमानमधिरुह्य वै ॥ ३२ ॥

अधिरोप्य विमानाग्रे राजानं त्रिदशाधिपः।
देवानामग्रतः कृत्वा ययौ स्वर्गं द्विजोत्तमाः ॥ ३३ ॥

ददौ तस्मै स्वधाभागं देवानामधिपस्तदा।
तुष्टुवुः सिद्धगन्धर्वा ननृतुश्चाप्सरोगणाः ॥
राजानं पुष्पवर्षैश्च पूजयामासुर्वै तदा ॥ ३४ ॥

इत्येतत् कथितं विप्रा हिमाचलकथोद्भवम्।
पुण्यधर्मपदं शुद्धं सर्वपापप्रणाशनम् ॥ ३५ ॥

यां सुपुण्यां कथां दिव्यां श्रुत्वा काशिपतिस्तदा।
प्राप्तवान् देवभवनं देहेनानेन सुव्रतः ॥ ३६ ॥

काशिराजस्य चाख्यानं हिमाचलकथां तथा।
य श्रृणोति महाभागाः सर्वपापैः प्रमुच्यते ॥ ३७ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे धन्वन्तरिस्वर्गारोहणं नामैकविंशतितमोऽध्यायः ॥ २१ ॥**

---

३१. –a) नें1.3 सकलां (→सकलं); ने2 सलक्ष्मी (→सलक्ष्मीं) –c) ने1 °प्रमुखेस् (→°प्रमुखे). –d) ने1 इच्छन् (→ईप्सन्).

३३. –b) ने3 त्रिदशाधिपाः (→त्रिदशाधिपः). ३४. –a) ने1.2 स्वधाभागै (ने1. °ग–) (→स्वधाभागं). –b) ने1.2 पूजयामासु वै (→पूजयामासुर्वै). ३५. –d) ने2.3 पुण्यं (→पुण्य–). ३६. –a) ने1 यासु पुण्या कथा दिव्यां. –c) ने2 भुवनं (→भवनं). –d) ने3 सुव्रताः (→सुव्रतः). ३७. –b) ने1 हिमाचलकथोत्तम. **पुष्पिका**–ने1 °स्वर्गारोहणे (→°स्वर्गारोहणं).

# २२

सूत उवाच ।

व्यासस्य वचनं श्रुत्वा ऋषयस्ते तपोधनाः ।
व्यासं धर्मार्थतत्त्वज्ञं पप्रच्छुर्नृपसत्तम ॥ १ ॥

ऋषय ऊचुः ।

श्रुतं मानसमाहात्म्यं त्वत्प्रसादात् तपोधन ।
अधुना श्रोतुमिच्छामः खण्डाख्यानं सुविस्तरम् ॥ २ ॥

व्यास उवाच ।

नन्दपर्वतमारभ्य यावत् काकगिरिः स्मृतः ।
तावद्वै मानसः खण्डः ख्यायते मुनिभिर्द्विजाः ॥ ३ ॥

संक्षेपेण महाभागाः कथयामि न संशयः ।
पश्चिमाभिमुखः साक्षाद्धिमाद्रिः ख्यायते बुधैः ॥ ४ ॥

तस्य दक्षिणभागे वै नाम्ना नन्दगिरिः स्मृतः ।
तत्र नन्दा महादेवी पूज्यते त्रिदशैरपि ॥ ५ ॥

तां दृष्ट्वा मानवः सम्यगैश्वर्यमिह लभ्यते ।
नास्ति नन्दासमा देवी भूतले वरदा शुभा ॥ ६ ॥

नन्दगोपगृहे देवी अवतीर्य न संशयः ।
कंसेन पोथिता पुण्यशिलापृष्ठे यतव्रताः ॥ ७ ॥

जगामाकाशमार्गेण पुण्यं सा नन्दपर्वतम् ।
ततः प्रभृति वै विप्राः पूज्यते त्रिदशैरपि ॥ ८ ॥

नन्दां संपूज्य मनुजाः पातकानि तरन्ति हि ।
नन्दाक्षेत्रसमं क्षेत्रं न पश्यामि द्विजोत्तमाः ॥ ९ ॥

---

२२

२. –c) ने3 इच्छामि (→इच्छामः). ३. –c) ने1 खण्डं (→खण्डः). ४. –a) ने1 संक्षेपेता (→संक्षेपेण), ७. –c) ने1 केसेन (→कंसेन); ने1 पुण्या (→पुण्य–). ८. –c) ने1 प्रभातयै (→प्रभृति वै). –d) ने2 पूज्यन्ते (→पूज्यते). ९. –a) ने2 नन्दो (→नन्दां); ने3 मनसा (→मनुजाः). –b) ने1 पातकान् वितरन्ति हि.

अश्वमेधस्य यज्ञस्य फलं भवति दर्शनात् ।
तस्मात् कोऽन्यतमो विप्राः क्षेत्रोऽस्ति भुवि मण्डले ॥ १० ॥

यत्रैका ब्राह्मणी काचिन् मेनका नाम नामतः ।
संपूज्य योगमायां वै पुंश्चली सा दिवं गता ॥ ११ ॥

ऋषय ऊचुः ।

कथं सा ब्राह्मणी ब्रह्मन् पुंश्चली धर्ममास्थिता ।
कथं वै ज्ञातवान् नन्दां पूजयामास तां कथम् ॥ १२ ॥

व्यास उवाच ।

पुरा कृतयुगस्यादौ पुलस्त्यस्य कुलोद्भवा ।
बभूव ब्राह्मणी काचिन् मेनका नाम नामतः ॥ १३ ॥

सुरूपा सुविशालाक्षी रूपेणाप्रतिमा भुवि ।
पतितां भूतले साक्षाच्चन्द्रकान्तिमिवापराम् ॥ १४ ॥

दृष्ट्वा तां पोषयामास पिता तस्या द्विजोत्तमाः ।
वर्द्धमाना पितुर्गेहे स्त्रीचिह्ना यौवने स्थिता ॥ १५ ॥

रूपलावण्यसंपन्ना बभूव वरवर्णिनी ।
पिता तस्यास्तदा विप्रस्तां दृष्ट्वा यौवने स्थिताम् ॥ १६ ॥

ददौ विप्राय चाग्र्याय अत्रिगोत्रोद्भवाय सः ।
सुतृप्तये सुयोग्याय संतानाख्याय वै द्विजाः ॥ १७ ॥

विवाहविधिना सोऽपि समुद्वाह्य तदा द्विजाः ।
ययौ सुशिविकारूढस्तया सह यतव्रतः ॥ १८ ॥

तस्यै दायादिकं सर्वं दत्त्वा स द्विजसत्तमः ।
तयोः प्रास्थानिकं पुण्यं मङ्गलं च चकार ह ॥ १९ ॥

सन्तानोऽपि महाभागः स्वगृहं प्राप्य सुव्रतः ।
रेमे स सुचिरं कालं सुन्दर्या प्रियया सह ॥ २० ॥

---

१०. –d) ने1 भुव (→भुवि).

११. –b) ने1 माम (→नाम). –c) ने1 °माया तां (→°मायां वै). १४. –a) ने1 सुविशालाक्षि (→सुविशालाक्षी). १५. –b) ने2 द्विजोत्तमः (→द्विजोत्तमाः). –d) ने1 स्थिताः (→स्थिता). १६. –b) ने3 °वर्णिनि (°वर्णिनी). –c) ने1 विप्रा, ने2 विप्रास् (→विप्रस्). –d) ने1 ता (→तां). १७. –c) ने सुतृप्ताय (→सुतृप्तये). १८. –c) ने3 स्वशिविका° (→सुशिविका°); –d) ने3 यतव्रताः (→यतव्रतः). १९. –c) ने1 ततो. (→तयोः), २०. –a) ने1 संततोपि (→संतानोऽपि); ने1 महाभागाः (→महाभागः).

कालेन स द्विजो विप्राः संस्नातुं सरयूं गतः ।
तां विहायानवद्याङ्गीं स्वाश्रमे सुविसर्जिते ॥ २१ ॥
निममज्ज ततः पुण्यां सरयूं ब्राह्मणोत्तमः ।
सुस्नानविधिना विप्रा ऋचाभिश्च समाहितः ॥ २२ ॥
ततो दैवेन योगेन निमज्जन्तं द्विजं द्विजाः ।
गृहीत्वा जलमध्यं वै मकरः प्रविवेश ह ॥ २३ ॥
मज्जमानं द्विजं दृष्ट्वा जनानां तत्र वासिनाम् ।
हाहेति सुमहानासीद् वज्रपातमिवापरम् ॥ २४ ॥
ततः सा मेनका साध्वी जनौघैः समुदाहृतम् ।
तं सरय्वां निपतितं पतिं पञ्चत्वतां गतम् ।
शुश्राव वचनं विप्रा वज्रपातमिवापरम् ॥ २५ ॥
श्रुत्वा तं सुभृशं दीना बभूव वरवर्णिनी ।
मतिं चक्रे तदा विप्रा गन्तुं सा पतिना सह ॥ २६ ॥
अन्तर्वत्नीं तु तां ज्ञात्वा निषेधं चक्रिरे जनाः ।
सा निषिद्धा द्विजैर्विप्रा वेदवेदाङ्गपारगैः ।
वर्जिता सा सुहृन्मित्रैर्नं ययौ पतिना सह ॥ २७ ॥
ततस्तस्यानुजो विप्राश्चक्रे तस्यौद्ध्र्वदैहिकम् ।
वेदोद्दिष्टेन विधिना ब्राह्मणैः सह सुव्रतः ॥ २८ ॥
वैधव्यं प्राप्य सा विप्रा दैवयोगेन मेनका ।
सुषुवे दशमे मासि पुत्रं देवसुतोपमम् ॥ २९ ॥
पतिव्रतपरा भूत्वा पुपोष तं शिशुं सती ।
शासिता बन्धुवर्गेण शिक्षिताऽपि महत्तमैः ॥ ३० ॥
कालेन साऽनवद्याङ्गी भिल्लं ब्राह्मणमागतम् ।
ददर्श गृहमायान्तं साक्षात्कल्पतरूपमम् ॥ ३१ ॥
तमातिथ्येन विधिना पूजयामास सा सती ।
तस्यातिथ्यं महाभागाः स वर्णी प्रतिगृह्य वै ॥ ३२ ॥

---

२१. –c) ने$_{2}$ ता (→तां); ने$_{1.3}$ °वद्याङ्गी (→°वद्याङ्गीं).
२२. –a) ने$_{1}$ निमज्जत पुण्यां (?). –d) ने$_{2}$ समाहिता (→समाहितः).
२३. –a) ने$_{3}$ देवेन (→दैवेन). २७. –a) ने$_{1.2}$ अन्तर्वत्नी (→अन्तर्वत्नीं).
३१. –b) ने$_{1}$ भित्वं, ने$_{2}$ भिष्वं (→भिल्लं). ३२. –a) ने$_{2}$ तमानियोन (?) (→तमातिथ्येन).–d) ने$_{2}$ ते (→वै).

रात्रौ तस्य गृहे पुण्ये उवास स वनेचरः।
ततोर्द्धरात्रौ तां साद्ध्वीं जगृहे स वनेचरः॥ ३३॥

सुप्तां पर्यङ्कमध्ये वै शिशुना सह शोभनाम्।
तां नीत्वा स ययौ विप्रा हिमालयतटे शुभे॥ ३४॥

ततो देवर्षिगन्धर्वैः सेविते सुमनोहरे।
स तत्र वरवर्णिन्या तया सह द्विजोत्तमाः॥
रेमे च सुचिरं कालं स्वर्णभूषणभूषितः॥ ३५॥

प्रत्यहं पूजयामास स नन्दां ब्राह्मणीपतिः।
तस्मै नन्दा महादेवी स्वर्णभारं दिने दिने।
ददौ तुष्टा जगद्धात्री नन्दपर्वतवासिनी॥ ३६॥

प्रातोत्थाय व्रजन्तं तं नीत्वा गन्धाक्षतादिकम्।
गृहीत्वा स्वर्णभारं वै प्रत्यायान्तं दिने दिने।
दृष्ट्वा सा ब्राह्मणी विप्रास्तं पप्रच्छ वनेचरम्॥ ३७॥

मेनका उवाच।

गन्धपुष्पादिकं नीत्वा कुत्र वै गम्यते त्वया।
कस्मादानीयते भारं पूर्णं स्वर्णमयं तथा॥ ३८॥

यदि ते सुप्रिया चास्मि तर्हि स त्वं(त्यं?)वनेचर।
कथयस्व विशेषज्ञ त्वामहं प्रणताऽस्मि वै॥ ३९॥

व्यास उवाच।

तस्या वचनमाकर्ण्य स भीतो ब्राह्मणीपतिः।
उवाच मेनकां पापः स्मरन्तीं पातकं बहु॥ ४०॥

भिल्ल उवाच।

इतो यो दृश्यते भद्रे पुण्यो नन्दगिरिः शुभः।
तत्र नन्दा महादेवी जागर्ति भुवनेश्वरी॥ ४१॥

पूजयामि महाभागां नन्दां पर्वतवासिनीम्।
गन्धपुष्पाक्षतैः शुद्धैर्वस्त्रैश्च विविधैरपि॥ ४२॥

---

३६–b) ने1 नन्दा (→नन्दां). ३८. –d) ने2 पूर्ण– (→पूर्णं). ३९. –b) ने2 वनेचरे (→वनेचर). ४१. –c) ने3 महादेवि (→महादेवी).

सा प्रसन्ना महाभागा स्वर्णभारं दिने दिने ।
प्रयच्छति न सन्देहः सत्यं ते व्याहृतं मया ॥ ४३ ॥

व्यास उवाच ।

इति भिल्लस्य वचनं श्रुत्वा सा मेनका द्विजाः ।
विस्मयोत्फुल्लनयना पप्रच्छ पुनरेव हि ॥ ४४ ॥

मेनका उवाच ।

सा केन विधिना भिल्ल पूज्यते परमेश्वरी ।
कथं तुष्टा मनुष्याणां वरं ते संप्रयच्छति ॥ ४५ ॥

व्यास उवाच ।

स तया परिपृष्टो वै यथापूर्वं वनेचरः ।
जगाद वचनं भूयस्तां प्रियां चारुभाषिणीम् ॥ ४६ ॥

भिल्ल उवाच ।

योऽसौ नन्दगिरिः साक्षान् मया ख्यातो हि मेनके ।
तत्र शिखरयोर्मध्ये पुण्यो नन्दासरः स्मृतः ॥ ४७ ॥

निमज्य विधिवत् तत्र नन्दिकेशं हरं व्रजेत् ।
नन्दिकेशं हरं तत्र संपूज्य विधिपूर्वकम् ॥ ४८ ॥

ततोऽधिरुह्य शिखरं नन्दां संपूज्य मेनके ।
ऐहिकामुष्मिकं चैव फलं तुष्टा प्रयच्छति ॥ ४९ ॥

श्रुत्वा नन्दाप्रभावं सा मेनका द्विजसत्तमाः ।
निःकृतिस्तत्र पापानां भविष्यति न संशयः ।
इति संचिन्त्य मनसा ययौ साऽपि दिने दिने ॥ ५० ॥

स्नात्वा नन्दासरे पुण्ये संपूज्य च महेश्वरीम् ।
प्रार्थयन्ती महामायामित्युवाच यतव्रताः ॥ ५१ ॥

नारायणि महामाये हिमाद्रितनये शुभे ।
पुंश्चल्या धर्महीनायाः पातकान् मे विनाशय ॥ ५२ ॥

इति देवीं महामायां प्रार्थयन्ती यतव्रता ।
निनाय कालं सुचिरं देवीपूजनतत्परा ॥ ५३ ॥

---

४३. –a) ने1 संप्रपन्ना, ने2 सांप्रसन्ना (→सा प्रसन्ना). ४७. –b) ने2 मयाख्याते हि तेन के. ४८. –b) ने1 हरे (→हरं).
५१. –b) ने3 महेश्वरम् (→महेश्वरीम्).

ततः कालेन सा विप्राः कृतान्तवशगाऽभवत् ।
नीता याम्यैर्यमपुरं पुंश्चली पापकारिणी ॥ ५४ ॥

ततः कालीं महाभागां नन्दपर्वतवासिनीम् ।
जगाद नन्दिका वाचं गच्छ देवि यमं प्रति ॥ ५५ ॥

तत्र विज्ञाप्य राजानं धर्माधर्मविचारकम् ।
तामानय बलाद् देवीं यमस्य वशवर्त्तिनीम् ।
मेनकां मे गृहे चाद्य मम भक्तिपरायणाम् ॥ ५६ ॥

व्यास उवाच ।

ततः काली महाभागा भवानीवचनं शुभम् ।
प्रगृह्य प्रययौ तत्र यत्र वै स महायमः ॥ ५७ ॥

तत्र गत्वा महाभीमा सा काली घोरदर्शना ।
यमं विज्ञापयामास मेनकामुक्तिहेतवे ॥ ५८ ॥

काल्युवाच ।

धर्मराज महाराज शृणु दौत्ये समागताम् ।
जानीहि सुविशालाक्षीं भवानीं हितकारिणीम् ॥ ५९ ॥

यदाह सा जगद्धात्री तत्कुरुष्व न संशयः ।
त्वद्गणैर्मेनका नामा ब्राह्मणी तव शासने ।
नीता सा वै कथं राजन् भवानीप्रियकारिणी ॥ ६० ॥

यम उवाच ।

शृणुष्व वचनं भद्रे मया वै समुदाहृतम् ।
पतिव्रतानां नारीणां वासो वै देवमण्डले ॥ ६१ ॥

पुंश्चलीनां च मे लोके निवासः कल्पितः पुरा ।
तस्माद् मच्छासनं देवी संस्थिता नात्र संशयः ॥ ६२ ॥

यदेषा ब्राह्मणी भूत्वा जाता भिल्लस्य चाङ्गना ।
तस्मान् मच्छासने योग्या विद्यते नात्र संशयः ॥ ६३ ॥

---

५४. –b) मे1 कृत्यन्त° (→कृतान्त°).

५५. –a) ने1.2 काली (→कालीं); ने1 महाभागा (→महाभागां). –c) ने2 चण्डिका, ने3 चन्द्रिका (→नन्दिका). ५६. –c) ने2.3 देवी (→देवीं). –e) ने2 मेनका (→मेनकां). –f) ने2 °परायणीम् (→°परायणाम्). ५९. –b) ने1.3 दैत्ये (→दौत्ये) –cd) ने2 जानीहि सुविशालाक्षी भवानी हितकारिणी.

६०. –a) ने2 जगद्धात्रि (→जगद्धात्री). ६२. –c) ने2 देवीं (→देवी).

६३. –a) ने2 ये देवा (→यदेषा).

अपि तीर्थशतैर्वापि तथा यज्ञशतैरपि ।
कायक्लेशादिकैर्वापि पुंश्चली नैव शुद्ध्यति ॥ ६४ ॥

कल्युवाच ।

नन्दासरस्य माहात्म्यं त्वया न ज्ञायते यम ।
तथैव पर्वते पुण्ये देवीपूजनजं फलम् ॥ ६५ ॥

किं न ज्ञातं त्वया पुण्यं देवीपूजनजं यम ।
ब्रह्महत्यादिभिः पापैर्मुच्यते यत्र वै जनः ॥ ६६ ॥

तं नन्दपर्वतक्षेत्रं किं न जानासि वै यम ।
यत्र पर्वतरूपेण साक्षाद् देवो जनार्दनः ।
वर्वर्ति पर्वतश्रेष्ठे किन्न जानासि तं यम ॥ ६७ ॥

व्यास उवाच ।

इत्युक्त्वा तं तदा काली गृहीत्वा मेनकां ततः ।
लोहपाशैर्निबद्धां तां विमुच्य प्रययौ गिरिम् ॥ ६८ ॥

करग्रहणमात्रेण सा काल्या मेनका द्विजाः ।
दिव्यरूपधरा साक्षाद् विष्णोः श्रीरिव भासति ॥ ६९ ॥

ततः काली समुत्पत्य यत्र नन्दा महेश्वरी ।
ययौ मेनकया सार्द्धं त्रिशूलवरभूषणा ॥
ततस्तां मेनकां देवी ददौ स्वर्गगतिं शुभाम् ॥ ७० ॥

अधिरुह्य विमानाग्रे सेविता नायिकागणैः ।
दृश्यतेऽद्यापि वै विप्रा मेनका स्वर्गमण्डले ॥ ७१ ॥

भिल्लोऽपि कालवशगो भूत्वा कालेन वै द्विजाः ।
ऐश्वर्यमतुलं चात्र भुक्त्वा भोगान् यथेप्सितान् ।
जगामान्ते शिवपुरं महामायाप्रसादतः ॥ ७२ ॥

इत्येतत्कथितं विप्रा नन्दाख्यानं सुविस्तरम् ।
आयुरारोग्यमैश्वर्यं सुखसंपद्विवर्द्धनम् ॥ ७३ ॥

---

६४. –a) ने1 तीर्थे (→तीर्थं–). –d) ने2 शुद्धयते (→शुद्धयति).
६५. –d) ने1 यम (→फलम्). ६७. –a) ने2.3 °संज्ञकं (→°पर्वत–).
६८. –d) ने1 गिरीम् (→गिरिं).
७०. –b) ने3 महेश्वरि (→महेश्वरी). ७१. –b) ने1 नायका° (→नायिका°).
७२. –f) ने1 मया माया–, ने3 महामायाः (→महामाया–).
७३. –d) ने2 सुषसंपद्धिवर्द्धतम्.

य इदं परमं पुण्यं नन्दामाहात्म्यमुत्तमम् ।
शृणुयाद् वा पठेद् वापि भुक्ति मुक्ति च विन्दति ॥ ७४ ॥

इति श्रीस्कन्दपुराणे मानसखण्डे नन्दामाहात्म्यं नाम
द्वाविंशतितमोऽध्यायः ॥ २२ ॥

---

७४. –d) ने1 भुक्तिभुक्ति–, ने3 भुक्तिमुक्ति (→भुक्ति मुक्ति).

## २३

ऋषय ऊचुः ।*

कथितं भवता ब्रह्मन् नन्दाख्यानं सुविस्तरम् ।
तत्रान्येषां सुपुण्यानां माहात्म्यं वद विस्तरात् ॥ १ ॥

व्यास उवाच ।

गिरेः शिखरयोर्मध्ये पुण्यो नन्दासरः स्मृतः ।
तत्र वै स्नानमात्रेण पातकाद् विप्रमुच्यते ॥ २ ॥

ततो वामे महापुण्यं वसिष्ठस्याश्रमं शुभम् ।
वसिष्ठं तत्र संपूज्य सर्वपापैः प्रमुच्यते ॥ ३ ॥

नन्दिकेशं हरं तत्र प्रपूज्य मुनिसत्तमाः ।
वाजपेयस्य यज्ञस्य फलमाप्नोति मानवः ॥ ४ ॥

तस्य वै शिखरे विप्राः साक्षात् पर्वतरूपिणम् ।
प्रपूज्य मानवः सम्यक् सर्वपापैः प्रमुच्यते ॥ ५ ॥

शङ्खचक्रगदापाणिं पद्मनाभं जनार्दनम् ।
प्रपूज्य सर्वपापेभ्यो मुच्यते द्विजसत्तमाः ॥ ६ ॥

वामे कालीं प्रपूज्याशु गुहायां संस्थितां शिवाम् ।
प्रपूज्य यमभीतिं वै नरो नाप्नोति वै द्विजाः ॥ ७ ॥

सन्ति तीर्थान्यनेकानि तस्मिन् नन्दगिरौ द्विजाः ।
न शक्यन्ते सुपुण्यानि वक्तुं वर्षशतैरपि ॥ ८ ॥

हिमसीकरमध्यस्थं चक्रपाणिं प्रपूज्य वै ।
जन्मत्रयार्जितान् पापान् मुच्यते नात्र संशयः ॥ ९ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे नन्दपर्वतमाहात्म्यं नाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥**

---

२३

* ने1 ऋषिरुवाच. १. -b) ने3 नन्दामाहात्म्यमुत्तमम्. ५. -a) ने2 शिखरं (→शिखरे) ६. -a) ने2 °पाणि -(→°पाणिं). ७. -a) ने1 2 काली (→कालीं). -d) ने1 माप्नोति (→नाप्नोति). ८. -a) ने1.2 तीर्थाण्य° (→तीर्थान्य°). ९. -a) ने3 °शीकर° (→°सीकर°).

# २४

ऋषय ऊचुः ।

कथितं भवता ब्रह्मन् नन्दपर्वतवर्णनम् ।
तत्रोद्भवायाः सरितस्तान् वै कथय सुव्रत ॥ १ ॥

व्यास उवाच ।

शृण्वन्तु ऋषयः सर्वे वचनं समुदाहृतम् ।
कथाप्रसङ्गबहुलं धर्ममार्गप्रदर्शकम् ॥ २ ॥

हिमाद्रेश्चोत्तरे भागे सिद्धकिन्नरसेविते ।
नन्दाद्रिकुक्षौ संभूता चातिशुद्धजलाशयः (?) ॥ ३ ॥

पिण्डारकेति विख्याता प्रार्थिता सिद्धनायकैः ।
विचित्रधातुसंकीर्णा नानावृक्षविराजिता ॥ ४ ॥

नानाविधैः पक्षिगणैः सेविता सुमानोहरा ।
काश्यपप्रमुखाणां हि ऋषीणामाश्रमैर्वृता ॥ ५ ॥

हंसकारण्डवाकीर्णा चक्रवाकैश्च सेविता ।
तीर्थैरनेकसाहस्रैः परिपूर्णमनोजवाः (?) ॥ ६ ॥

बभूव सा सरिच्छ्रेष्ठा शङ्करस्य जटोद्भवा ।
भित्त्वा पर्वतमुख्यान् वै सङ्गता सरसोद्भवा ॥ ७ ॥

सङ्गमे विष्णुगङ्गायाः सङ्गता सरितां वरा ।
मूले तस्या महादेवं जटीशाख्यं द्विजोत्तमाः ॥ ८ ॥

शतरुद्राभिषेकेण योभिषिक्ते महेश्वरम् ।
त्रिसप्तकुलमुद्धृत्य पूज्यते शिवकिङ्करैः ॥ ९ ॥

ततः पिण्डारकासङ्गे कालीनामा सरिद्वरा ।
सङ्गता मुनिशार्दूला वीचिविक्षोभसंयुता ॥ १० ॥

---

२४

१. –b) ने$_{1}$ नंदं (→नन्द–). २. –b) ने$_{1}$ *वचं (→वचनं). ३. –d) ने$_{1.3}$ °शयाः (→°शयः). ५. –c) ने$_{1}$ °प्रमुषाणां (→°प्रमुखाणां). ८. –d) ने$_{1}$ महेश्वरम् (→द्विजोत्तमाः). ९. –b) ने$_{1}$ योभिविक्ते, ने$_{2}$ योभिर्षिगे (→योभि-षिक्ते). –d) ने$_{1}$ °किन्नरैः (°किङ्करैः). १०. –b) ने$_{1}$ °द्वराः (→°द्वरा).

तत्र कालह्रदं पुण्यं ख्यायते चातिविस्तृतम् ।
तत्र स्नात्वा च विधिवत् पातकाद् विप्रमुच्यते ॥ ११ ॥

पिण्डारकायाः सुजलैस्तपोधना
निमज्य सन्तर्प्य पितॄन् स्वकान् तथा ।
प्राप्नोति पुण्यं त्रिदशेन्द्रसेवितम्
सुप्रार्थितं नारदफल्गुनादिभिः ॥ १२ ॥

ततः सरस्वतीसङ्गं पुण्यमस्ति तपोधनाः ।
तत्र स्नात्वा च मनुजः स्त्रीवधाद् विप्रमुच्यते ॥ १३ ॥

दक्षिणे कमलासङ्गं पुण्यमस्ति न संशयः ।
तत्र स्नात्वा महाभागो जायते मानवो भुवि ॥ १४ ॥

वामे शेषवतीनामा (?) गुहा सुबहुवर्णिता ।
तत्र शेषेश्वरं देवं शेषनागं तथैव च ॥ १५ ॥

संपूज्य पातकान् सर्वान् हित्वा शिवपुरं व्रजेत् ।
वैण्यपर्वतसंभूता वैण्या नामा (?) महानदी ॥ १६ ॥

ययौ पिण्डारकासङ्गे पातकानां विनाशिनी ।
तयोः सङ्गे महाभागा नाम्ना विन्ध्यसरः स्मृतः ॥ १७ ॥

तत्र स्नात्वा च मनुजः शुद्धदेहो भवेदिह ।
तत्र वैण्यगिरौ पुण्ये बौद्धनागेति विश्रुतः ॥ १८ ॥

तस्य पृष्ठे समुद्भूता बोधनी सरितां वरा ।
ययौ पिण्डारकासङ्गे देवर्षिगणसेविते ॥ १९ ॥

तयोः सङ्गे महाविष्णुं बौद्धरूपधरं प्रभुम् ।
पूजयित्वा च मनुजो विष्णुलोके महीयते ॥ २० ॥

ततो मध्ये महादेवं पुण्यं केदारसंज्ञकम् ।
संपूज्य मानवः सम्यक् शिवभक्तिमवाप्नुयात् ॥ २१ ॥

---

११. –a) ने1 काली (→काल–). –b) ने2 विस्मृतम् (→विस्तृतम्). –d) ने2.3 पातकैर् (→पातकाद्). १३.–b) ने1 तपोधना (→तपोधनाः). १४. –a) ने1 कमठी° (→कमला°). १६. –a) ने1 सर्वां (→सर्वान्). १६. –c) ने1.2 वैध्या, ने3 वैंध्या (→वैण्या).

१७. –c) ने1 संगं (→सङ्गे); ने2.3 °नागा (→°भागा).

१८. –d) ने2 बोद्ध° (→बौद्ध°). २०. –b) ने1 बोद्ध° (→बौद्ध°).

२१. –b) ने2 पुण्य–(→पुण्यं). –d) ने1 सिव° (→शिव°).

वृश्चिकी कृकलासी च नन्दपर्वतसम्भवा ।
सरितौ तां सरिच्छ्रेष्ठां ययतुर्द्विजसत्तमाः ॥ २२ ॥

तासु स्नात्वा च मनुजस्तथा तासां च सङ्गमे ।
दुःकृतादब्दभूताद् वै तरते नात्र संशयः ॥ २३ ॥

सङ्गमे विष्णुगङ्गायाः पुण्या पिण्डारका सरित् ।
आवर्तशतसंकीर्णा तरङ्गैर्व्याकुलीकृता ॥ २४ ॥

ययौ पुण्यप्रदा शुद्धा पातकान्तकरी सरित् ।
विष्णुपादसमुद्भूतां विष्णुगङ्गां महानदीम् ॥ २५ ॥

संमिलन् सरितां श्रेष्ठा पयः फेननिभा शुभा ।
तयोर्मध्ये महाभागा दुःकृतान्तकरं शुभम् ॥ २६ ॥

पुण्यराशिप्रदं तीर्थं प्रयागं कर्णसंज्ञकम् ।
दुःकृतानि विलीयन्ते हिमवद्भास्करोदये ॥ २७ ॥

यं दृष्ट्वा मुनिशार्दूलाः पुण्यराशिमहोदयः ।
ये स्मरन्ति महाभागास्ते यान्ति हरिमन्दिरम् ॥ २८ ॥

कर्णप्रयागं संप्राप्य मज्जनं ये चरन्ति हि ।
तेषां विष्णुगृहे वासो विद्यते नात्र संशयः ॥ २९ ॥

असारभूते संसारे प्रयागं कर्णसंज्ञकम् ।
प्राप्य वासं न कुर्वन्ति ते मूढा नात्र संशयः ॥ ३० ॥

गङ्गायमुनयोः सङ्गे माघस्नानेन यत्फलम् ।
तत्फलं स्नानमात्रेण प्रयागे कर्णसंज्ञके ॥
प्राप्यते नात्र सन्देहः सत्यं सत्यं मयोदितम् ॥ ३१ ॥

तावद् गर्जन्ति तीर्थानि भूलोके द्विजसत्तमाः ।
यावन्न कर्णसङ्गे वै प्रयागे मज्जनं कृतम् ॥ ३२ ॥

तावद् वसन्ति पितरो नरके द्विजसत्तमाः ।
यावन्न तर्पिताः पुण्ये प्रयागे कर्णसंज्ञके ॥ ३३ ॥

---

२२. –b) ने2 °वचन° (→°पर्वत°).–d) ने3 नृप° (→द्विज°). २३. –c) ने1 दुःकृताददभूताद् वै. २४. –b) ने2 पिण्डारकां (→पिण्डारका). २४. –d) ने2.3 व्याकुला° (→व्याकुली°). २७. –a) ने1 तीर्थ– (→तीर्थं).
२९. –b) ने1.2 मजनं (→मज्जनं).
३१. –f) ने2 सत्यसत्यं (→सत्यं सत्यं). ३२. –c) ने2 °संज्ञे (→°संङ्गे).

कर्णप्रयागसदृशं नान्यं पश्यामि भूतले ।
देवर्षिमानवानां च पुण्यं तुष्टिकरं शुभम् ॥ ३४ ॥

तत्र चान्नप्रदानेन ब्राह्मणेभ्यो द्विजोत्तमाः ।
प्राप्य भूमण्डलं सर्वं साम्राज्यं याति शाश्वतम् ॥ ३५ ॥

एकतः क्रतवः सर्वे समस्ताध्वरदक्षिणाः ।
एकतः कर्णसंज्ञे वै प्रयागे मज्जनं स्मृतम् ॥ ३६ ॥

यत्र कर्णो महाभागाः प्रार्थयन् कश्यपात्मजम् ।
पितरं ज्योतिमध्यस्थं ददौ दानान्यनेकशः ॥ ३७ ॥

ततस्तं सविता तुष्टो दत्त्वाभिलषितं वरम् ।
तथास्त्राणि च दिव्यानि बाणानि विविधानि च ॥ ३८ ॥

दिननाथाद् वरं प्राप्य मनोऽभिलषितं शुभम् ।
प्रददौ रत्नभारान् वै ब्राह्मणेभ्यो न संशयः ॥ ३९ ॥

गोभूतिलहिरण्यादीन् तथैव गुडधेनवः ।
दत्त्वा विसर्ज्य वै विप्रान् स्वनाम्ना कर्णसंज्ञकम् ॥ ४० ॥

पूजितं देवगन्धर्वैः स सूर्यतनयो बली ।
प्रयागं कल्पयामास प्रयागसदृशं शुभम् ॥ ४१ ॥

तत्र कर्णेश्वरं नाम देवं संस्थाप्य वै द्विजाः ।
संपूज्य कमलाकान्तं ययौ स गजसाह्वयम् ॥ ४२ ॥

ततः प्रभृति वै लोके प्रयागः कर्णसंज्ञकः ।
व्याख्यायते महाभागा ऋषिभि सत्यवादिभिः ॥ ४३ ॥

तत्र कर्णेश्वरं नाम देवं यः पूजयेत् सुधीः ।
संसारसागरं तीर्त्वा स याति शिवमन्दिरम् ॥ ४४ ॥

तत्रैव कमलाकान्तं जले यः पूजयेद् धिया ।
त्रिसप्तककुलैः सार्द्धं स विष्णुभवनं व्रजेत् ॥ ४५ ॥

---

३४. –c) ने1 हि (→च). ३५. –c)ने2 सर्वे (→सर्वं). ३६. –c) ने3 स्वर्ण° (→कर्ण°). –d) ने.1.2 मजनं (→मज्जनं). ३८. –b) ने1 ददौ° (→दत्वा°). ३९. –b) ने1 वरम् (→शुभम्).

४१. –a) ने1 पूजिते (→पूजितं). ४३. –b) ने1 °संज्ञकम् (→°संज्ञकः). ४४. –b) ने1.2 सुधी (→सुधीः). ४५. –b) ने1.2 विषाः (→धियाः). –c) ने1 त्रिसप्तकुलभिः सार्द्धं.

इत्येतत् कथितं विप्रा यथा पिण्डारका सरित् ।
संभूत्वा विष्णुगङ्गायां सङ्गमे सङ्गता शुभा ॥ ४६ ॥
धन्यं यशस्यमायुष्यं पुत्रीयं सर्वकामदम् ।
कर्णप्रयागमाहात्म्यं श्रुत्वा पापात् प्रमुच्यते ॥ ४७ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे कर्णप्रयागमाहात्म्ये पिण्डारकामाहात्म्यं नाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥**

## २५

ऋषय ऊचुः ।*

श्रुतं पिण्डारकाख्यानं प्रयागस्य तथैव हि ।
त्वत्तो याः सरितः पुण्याः पर्वता ये तपोधन ।
माहात्म्यं श्रोतुमिच्छामस्तासां तेषां च सुव्रत ॥ १ ॥

व्यास उवाच ।

ततस्तु दक्षिणाशायां प्रयागस्य यतव्रताः ।
वैन्ध्यो नाम गिरिः पुण्यः शिखरैः पञ्चभिर्युतः ॥ २ ॥

नानावृक्षलताकीर्णो नानाधातुविराजितः ।
सिद्धगन्धर्वकन्याभिः सेवितः सुमनोहरः ॥ ३ ॥

विद्यते मुनिशार्दूला द्वितीयो हिमवानिव ।
तमारुह्य महाभागाः पापान् मासकृताज्जनाः ।
विमुञ्चन्ति न सन्देहः कृष्णानिह महर्षयः ॥ ४ ॥

तस्य वामे महाभागा वैन्ध्या नामा महेश्वरी ।
पूज्यते सिद्धगन्धर्वैः तथा षोडशमातृभिः ॥ ५ ॥

तां पूज्य मानवानां वै शत्रुतो न भयं भवेत् ।
तस्य पश्चिमभागे वै दारकाख्यं महागिरिम् ।
समारुह्य महापुण्यं दारकां प्रतिपूजयेत् ॥ ६ ॥

तत्रोद्भवा सरिच्छ्रेष्ठा चन्द्रार्द्धा द्विजसत्तमाः ।
चन्द्रार्धसदृशी पुण्या गता पिण्डारकां प्रति ।
निमज्य विधिवत् तस्यां देहं चन्द्रोपमं भवेत् ॥ ७ ॥

---

२५

* ने2 ऋषय उवाच.

१. –c) ने2.3 ततो याः (→त्वत्तोयाः). –f) ने1.2 सुव्रतः (→सुव्रत). २. –c) ने1 वैध्यो (→वैन्ध्यो). ४. –a) ने3 विद्यंते (→विद्यते). –d) ने2 पापान्माप्यकृतज्जनः, ने3 पापान्माप्य सकृज्जनं.–f )ने1 कृष्णादिव, ने2 कृष्णानिद(→कृष्णानिह). ५. –a) ने2 महानागा (→महाभागा). –c) ने1 पूजिते (→पूज्यते). ६. –a) ने1 हि (→वै). ७. –b) ने1 सुचन्द्रा (→चन्द्रार्द्धा). –e) ने3 निमज्ज (→निमज्य). –f) ने2 देहे (→देहं).

ततो दुर्विन्ध्यनामो वै पर्वतः समुदाहृतः ।
तत्र दुर्विन्ध्यसंज्ञं वै नागं संपूज्य मानवाः ।
सर्पभीतिं न विन्दति दशवर्षाणि पञ्च च ॥ ८ ॥

ततः पाण्डुगिरिः पुण्यः ख्यायते ऋषिसत्तमाः ।
यमारुह्य जनाः सर्वे स्नात्वा पाण्डुह्लदे शुभे ।
व्रजन्ति देवभवनं गन्धर्वजनसेवितम् ॥ ९ ॥

पाण्डोः पूर्वं महाभागाः पुण्यो वेणुगिरिः स्मृतः ।
उच्छ्रितैः शिष(ख?)रैः क्रान्तो महामेरुरिवापरः ॥ १० ॥

आकरैर्विविधैर्युक्तो गुहाभिश्च विराजितः ।
चन्द्रकान्ताभिः पुण्याभिः शिलाभिः परिवेष्टितः ॥ ११ ॥

विद्यते नातिदीर्घो वै साक्षाच्छीततनूपमः ।
शिखरे तस्य वै विप्रा चूडेशाख्यं महेश्वरम् ।
संपूज्य मानवः सम्यक् शिवलोकमवाप्नुयात् ॥ १२ ॥

श्रृण्वन्तु मुनिशार्दूलाश्चूडेशाख्यं हि वर्णनम् ।
पातकान्तकरं भूरि सत्यमार्गप्रदर्शकम् ॥ १३ ॥

पातकानां विनाशाय यत्र देवो महेश्वरः ।
वर्वर्त्ति मुनिशार्दूलाः तस्मात् कोऽन्यतमोऽधिकः ॥ १४ ॥

उपपातकलिप्तानां जनानां निष्कृतिर्न हि ।
चूडेश्वरं महादेवं संपूज्य मुनिसत्तमाः ॥ १५ ॥

यत्र चूडामणिर्नागो मुक्तो ब्रह्मवधात् किल ।
शैवीं भक्तीं (क्तिं?) समारुह्य श्रुत्वा शिवकथां तथा ॥ १६ ॥

ऋषय ऊचुः ।

कथं चूडामणिर्नागः किल्बिषं कृतवान् पुरा ।
कथं शैवीं कथां श्रुत्वा मुक्तो द्विजवधाद् गुरो ॥ १७ ॥

---

८. –d) ने$_2$ नाग (→नागं).

९. –e) ने$_1$ °भुवनं (→°भवनं). १०. –a) ने$_1$ पूर्वे (→पूर्वं). –b) ने$_2$ स्मृता (→स्मृतः). –c) ने$_1$ शिषिरैः (→शिखरैः). १२. –b) ने$_1$ साक्षाच्छीवतनूपमः. १३. –b) ने$_1$ वर्णितम् (→वर्णनम्). –d) ने$_3$ सत्व° (→सत्य°). १४. –c) ने$_2$ वर्वति (→वर्वर्त्ति). १५. –cd) ने$_1$ महादेवमपूज्य. (→महादेवं संपूज्य). ने$_3$. १६०.

१७. –c) ने$_2$ शैवीकथां (→शैवीं कथां).

व्यास उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
नागराजस्य संवादं ब्राह्मणस्य तपोधनाः ॥ १८ ॥

कश्यपस्य सुतो विप्राः स कद्रुतनयो बली ।
श्रेष्ठो नागसमाजे वै चूडामणिरितीरितः ॥ १९ ॥

जितेन्द्रियो जितारातिर्निर्ममो निरहङ्कृतः ।
बभूव मुनिशार्दूलाः स नागो धर्मतत्परः ॥ २० ॥

हिंसावृत्तिं परित्यज्य वायुभक्षो जितेन्द्रियः ।
शीर्णपर्णजलाहारो बभूव मुनिसत्तमाः ॥ २१ ॥

कदाचिद् भूतलं पुण्यं ज्ञात्वा नागो जगाम ह ।
ददर्श स महीमध्ये तीर्थानि विविधानि च ॥ २२ ॥

यत्र यत्र सुपुण्यं वै तीर्थं स दृष्टवानिह ।
तत्र तत्र तपस्तेपे पर्णमूलफलाशनः ॥ २३ ॥

कालेन महता विप्रास्तपस्यन्तं नदीतटे ।
नागं संताडयामास यष्टिना ब्राह्मणो गुणी ॥ २४ ॥

ततस्तं दंशयामास रुषितो नागनायकः ।
स पपात महीपृष्ठे दष्टो नागेन वै द्विजः ॥ २५ ॥

ततस्तं ब्राह्मणं ज्ञात्वा पतितं धरणीतले ।
कथं मुक्तो भविष्यामि इति संचिन्त्य वै वने ।
स्वकर्म गर्हयन् विप्रा ययौ नागो महामनाः ॥ २६ ॥

ददर्श स तपस्यन्तं ब्राह्मणं गहने वने ।
अनन्यचेतसं साक्षाद् ध्यायमानं जनार्दनम् ॥ २७ ॥

तं ननाम तदा नागो परिपूर्णेन चेतसा ।
तस्य वाष्पेन तप्ताङ्गो ब्राह्मणो द्विजसत्तमाः ॥ २८ ॥

---

१८. –ab) ने$_1$ °हरन्तीहमिति° (→°हरन्तीममिति°).

१९. –a) ने$_1$ कस्य यस्य (→कश्यपस्य). –b) ने$_3$ कण्डु° (→कद्रु°). २०. –a) ने$_1$ जितात्माना (→जितारातिर्). २१. ने$_3$. ⊙. –b) ने$_1$ जितेन्द्रिय (→जितेन्द्रियः). –c) ने$_1$ शीर्णपत्रजलाधारो. –d) ने$_2$ °सत्तमः (→°सत्तमाः). २३. –d) ने$_1$ °फलाशन (→°फलाशनः). २५ –a) ने$_1$ दर्शयामास (→दंशयामास). –d) ने$_2$ दुष्टो (→दंष्टो). २६. –f) ने$_1$ महामना (→महामनाः). २८. –c) ने$_1$ वाक्येन (→वाष्पेन). –d) ने$_1$ °सत्तमा (→°सत्तमाः).

कोऽयमित्येव सञ्चिन्त्य ददर्शाजगरं महान् ।
प्रणतं प्रणतो भूत्वा तमुवाच तदा द्विजः ॥ २९ ॥

ब्राह्मण उवाच ।

धृत्वा नागशरीरं वै को भवानसि शंस मे ।
केन त्वमिह संप्राप्तो भूत्वा म्लानमुखः स्वयम् ॥ ३० ॥

व्यास उवाच ।

सर्पस्तद्वचनं श्रुत्वा वाष्पगद्गदया गिरा ।
उवाच वचनं सम्यक् यथा पूर्वं हि वै द्विजाः ॥ ३१ ॥

नाग उवाच ।

देहं स्वाभाविकं विप्र विद्यते मे न संशयः ।
यत्त्वया म्लानवदनं पृष्टो मे कथयामि तत् ॥ ३२ ॥
अहं चूडामणिर्नाम नागोऽस्मि द्विजसत्तम ।
शीर्णपर्णाशनं नाम व्रतमास्थाय संस्थितः ॥ ३३ ॥
तीर्थानि भूतले श्रुत्वा सोऽहं भूमौ समागतः ।
दृष्ट्वा तीर्थाण्यनेकानि नीतं वर्षं शतं मया ॥ ३४ ॥
साम्प्रतं दैवयोगेन प्राप्तवान् सुजुगुप्सितम् ।
तेनाहं म्लानवदनो जातोऽस्मि द्विजसत्तम ॥ ३५ ॥

ऋषिरुवाच ।

कथं जुगुप्सितं कर्म कृतवानसि साम्प्रतम् ।
तत्सर्वं ब्रूहि मे नाग करिष्यामि हितं तव ॥ ३६ ॥

नाग उवाच ।

तपस्यन्तं मां कश्चित् सुपुण्ये सरयूतटे ।
ब्राह्मणस्ताडयामास यष्टिना द्विजसत्तम ॥ ३७ ॥
रुषितेन मया ब्रह्मन् ब्रह्मणो विनिपातितः ।
पापेन तेन मे चाद्य म्लानं संजायते मुखम् ॥ ३८ ॥

---

३०. –a) ने$_1$ °शरीरे (→°शरीरं). ३१. –a) ने$_2$ सर्पास् (→सर्पस्). ३२. –a) ने$_1$ स्वभाविकं (→स्वाभाविकं). –b) ने$_1$ विषते, ने$_3$ विद्येते (→विद्यते). ३३. –c) ने$_1$ °पत्राशनं (→°पर्णाशनं). ३४. –b) ने$_2$ समा*तः (→समागतः). –c) ने$_2$ वृक्षा° (→तीर्था°). ३५. –a) ने$_1$ देव° (→दैव°). –d) ने$_1$ °सत्तमः (→°सत्तम). ३७. –d) ने$_2$ °सत्तमः(→°सत्तम). ३८. –d) ने$_1$ मुखे (→मुखम्).

नास्य पापस्य निःकृतिं पश्यामि द्विजसत्तम ।
अपि तीर्थशतैर्वापि तपोयज्ञैः सदक्षिणैः ॥ ३९ ॥

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
यदि जानासि वै ब्रह्मन्नुपायं तद् वदस्व मे ॥ ४० ॥

ऋषिरुवाच ।

प्रायश्चित्तैस्तपोयज्ञैर्दानैश्च विविधैरपि ।
अन्येषां पातकानां च निःकृतिर्विद्यते भुवि ॥ ४१ ॥

निःकृतिर्ब्रह्महत्यायाः नास्ति नागपते क्वचित् ।
तथापि कथयिष्यामि निःकृतिं ते न संशयः ॥ ४२ ॥

अस्त्युत्तरस्यां दिशि पुण्यसंज्ञो
हिमालयो नाम सुरेशसेव्यः ।
तस्याः सुकक्षे किल वेणुनामा
विराजते मेरुसमानकक्षः ॥ ४३ ॥

तस्मिन् महाद्रौ त्रिदशैः सुपूजित-
श्चूडेश्वरो नाम हरो विराजते ।
मृदङ्गवाद्यैः पणवैश्च गोमुखैः
सेवन्ति देवाः सचतुर्मुखं विभुम् ॥ ४४ ॥

त्वं तत्र गत्वा शितिकण्ठदेवं
चूडेश्वरं देवपतिं महेशम् ।
आराध्य तं विप्रवधाद्धि नाग
विमुक्तिमाप्नोसि न संशयोऽस्तु ॥ ४५ ॥

व्यास उवाच ।

मुनेस्तु वचनं श्रुत्वा स नागो हर्षपूरितः ।
प्रत्युवाच ऋषिं विप्र वाष्पव्याकुलया गिरा ॥ ४६ ॥

नाग उवाच ।

कस्मात् प्रवेशः क्षेत्रेऽस्मिन् निर्गमः कुत्रतः स्मृतः ।
कथं पूजाविधानं वै कथयस्व तपोधन ॥ ४७ ॥

---

३९. –d) ने1.2 सुदक्षिणैः (→सदक्षिणैः). ४०. –cd) ने2 ब्रह्मन्युपायं (→ब्रह्मन्नुपायं). ४२. –d) ने1 निःकृति (→निःकृतिं). ४३. –c) ने1 तस्य (→तस्याः). ४५. –a) ने1 तं (→त्वं). ४७. –d) ने2 तपोधनः (→तपोधन).

ऋषिरुवाच।

श्रृणुष्व नागशार्दूल वचनं मे उदाहृतम्।
उवाचवचनं विप्रा धर्ममार्गप्रदर्शकम्॥ ४८॥

यथा तस्मिन् प्रवेशो वै निर्गमस्तु यथा स्मृतः।
उत्तरस्यां दिशि नाग नाम्ना नगपुरो गिरिः॥ ४९॥

तस्य वामे महापुण्या नदी सारा महानदी।
तां निमज्य महाभाग सुपुण्यां रथवाहिनीम्॥ ५०॥

गत्वा निमज्य विधिवत् संतर्प्य विधिपूर्वकम्।
पितुः पितामहादींश्च ततो ब्रह्महृदं व्रजेत्॥ ५१॥

स्नात्वा ब्रह्महृदे पुण्ये गौतमाख्यं हृदं व्रजेत्।
गौतमीरथवाहिन्योः सङ्गमे विधिपूर्वकम्॥ ५२॥

संस्नाप्य रथवाहिन्याः दक्षिणे गोष्पतिं शिवम्।
गत्वा संपूज्य वै नाग गरुडेशं महेश्वरम्॥ ५३॥

ततः पाण्डुवने गत्वा स्नात्वा पाण्डुसरे तथा।
ततो वेणुगिरिं गत्वा चूडेशं प्रणतो व्रजेत्॥ ५४॥

गन्धपुष्पाक्षतैः पुण्यैः संपूज्य विधिपूर्वकम्।
प्रणम्य च यथान्यायं परिक्रम्य पुनः पुनः॥ ५५॥

स्नात्वा च रथवाहिन्या मूले प्रयतमानसः।
ततो निष्क्रमणं कृत्वा पुण्यं देवतटं व्रजेत्॥ ५६॥

तत्र स्नात्वा च विधिवत् सर्वपापैः प्रमुच्यते।
स्वस्ति तेऽस्तु महानाग व्रजस्व सुसमाहितः॥ ५७॥

---

४७ श्लोकात्परम् ने1 अधिकम्—

व्यास उवाच।

इति तस्य वचः श्रुत्वा ऋषिर्ध्यानपरायणः।
उवाब वचनं विप्रा धर्ममार्गप्रदर्शकम्॥ ४८॥

४८. –d) ने1 धर्ममार्गश्च दर्शकम्.

४९. –d) ने1 नाग° (→नग°); ने1 गिरि (→गिरिः).

५०. –d) ने2 °वाहिणीन् (→°वाहिनीम्). ५१. –d) ने1 °हृदो (→°हृदं).

५२. –c) ने1 °वाहिन्यो, ने3 °वाविन्यैः (→°वाहिन्योः).

५३. –b) ने1 गीतपर्वतम् (→गोष्पतिं शिवम्). –d) ने1.3 गरुदेशं (→गरुडेशं).

५६. –d) ने1 पुण्य–(→पुण्यं). ५७. –c) ने1 स्वस्तितस्तु (→स्वस्ति तेऽस्तु).

व्यास उवाच ।

इति तस्य ऋषेर्वाक्यमाकर्ण्य स महामनाः ।
जगामोत्तरमार्गेण यत्र स्याद् रथवाहिनी ।
तां निमज्य महाभागाः स नागो गौतमे ह्रदे ।। ५८ ।।
गरुडेशं महादेवं वामे संपूज्य वै तथा ।
चूडेशस्य स्थलं दिव्यं जगाम स महामतिः ।। ५९ ।।
तत्र चूडेश्वरं देवं संपूज्य स पुनः पुनः ।
ननाम परया भक्त्या परिक्रम्य तथैव च ।। ६० ।।

ततस्तु रथवाहिन्या मूले संस्नाप्य वै तथा ।
संप्राप्य परमां सिद्धिं मुक्तो द्विजवधाद् द्विजाः ।। ६१ ।।
ततः प्रभृति वै विप्रः स नागः परमेश्वरम् ।
पूजयामास विधिवद् ऋषिणा चोपदेशितः ।। ६२ ।।
चूडेश्वरस्य माहात्म्यं मयैतत् समुदाहृतम् ।
यः श्रृणोति महाभागाः सर्वपापैः प्रमुच्यते ।। ६३ ।।

**इति श्रीस्कन्दपुराणे मानसखण्डे चूडेश्वरमाहात्म्यं नाम पञ्चविंशतितमोऽध्यायः ।। २५ ।।**

---

५८. –b) ने2 महात्मना (→महामनाः). ५९. –d) ने1 महामति (→महामतिः). ६०. –a) ने1 देव (→देवं). ६१. –d) ने1 द्विजा (→द्विजाः). ६२. –d) ने3 चोपदेशिता (→चोपदेशितः). ६३. –b) ने2 मयैतातमनुदाहृतम्.

## २६

ऋषय ऊचुः ।

श्रुतं चूडेशमाहात्म्यं त्वत्तो हि मुनिसत्तम ।
माहात्म्यं रथवाहिन्याः श्रोतुमिच्छामहे प्रभो ॥ १ ॥

व्यास उवाच ।

शृण्वतां मुनिशार्दूला गङ्गामाहात्म्यमुत्तमम् ।
सर्वपापप्रशमनं सर्वोपद्रवनाशनम् ॥ २ ॥

अणुमात्रमपि स्पृष्टा या पुण्या रथवाहिनी ।
ददाति ब्रह्मभुवनं किमु स्नात्वा द्विजोत्तमाः ॥ ३ ॥

योजनाद् दूरतो दृष्ट्वा यां पुण्यां रथवाहिनीम् ।
विलीयन्ते ह पापानि हिमवद् भास्करोदये ॥ ४ ॥

गङ्गायाः सप्तमो वाहो विद्यते मुनिसत्तमाः ।
यां वै भगीरथो राजा रथमार्गेण वाहयत् ॥ ५ ॥

ऋषय ऊचुः ।

कथं भगीरथो राजा रथमार्गे तपोधन ।
गङ्गां समानयामास विष्णुपादसमुद्भवाम् ॥ ६ ॥

व्यासोवाच ।*

गङ्गां स पतितां दृष्ट्वा सुपुण्ये वेणुपर्वते ।
रथं संचालयामास रथमार्गेण तां तथा ।
ततः प्रभृति वै विप्राः ख्याता सा रथवाहिनी ॥ ७ ॥

---

१. –b) ने2 °सत्तमं (→°सत्तम). –c) ने1 °वाहिन्या (→°वाहिन्याः). २. ने3 २ c –३d ⊙. –a) ने1 °शार्दूल (→°शार्दूला). ३. ने3. ⊙ (द्र. २ पा. वि.). –a) ने1 स्पृष्ट्वा (→स्पृष्टा). –d) ने2 विष्णु-(→किमु). ५ –b) ने2 °सत्तमः (→°सत्तमाः). –c) ने1 यो (→यां). ६. –b) ने2 तपोधना (→तपोधन).

६ श्लोकस्य b, c मध्ये ने1 अधिकम् —

"वाहयामास वै गंगा सुपुण्यां रथवाहिनों ।
व्यास उवाच ।
सागराणां स राजर्षिर्मुक्तिमिच्छन् तपोधना ॥"

* ने1. ⊙.

विष्णोश्चरणसंभूता पतिता वेणुपर्वते ।
भगीरथेन पुण्येन प्रार्थिता रथवाहिनी ॥
बभूव वेणुसंज्ञे वै पर्वते सरितां वरा ॥ ८ ॥

मकरैः कमठैश्चापि परिपूर्णा मनोहरा ।
नानाविधैः पक्षिगणैः सेविता सुमनोहरा ॥ ९ ॥

गाङ्गेयसिकतामिश्रा स्वर्णधातुविराजिता ।
पातकानां विनाशाय एका या भूतले स्थिता ॥ १० ॥

तीर्थैरनेकसाहस्रैः परिपूर्णा महानदी ।
तस्यां वै स्नानमात्रेण जनाः दुःकृतकारिणः ।
शुद्धिं यान्ति न सन्देहः सत्यं सत्यं मयोदितम् ॥ ११ ॥

ये निमज्जन्ति मनुजाः पुण्यां तां रथवाहिनीम् ।
शतजन्मार्जितं पापं निमज्य क्षालयन्ति ते ॥ १२ ॥

नास्ति गङ्गासमं तीर्थं न हि व्याससमा द्विजाः ।
अन्नदानसमं दानं नास्ति नास्ति भुवःस्थले ॥ १३ ॥

प्रवाहः मुनिशार्दूला गङ्गायाः सप्तमं शुभम् ।
प्राप्य ये न निमज्जन्ति ते यान्ति नरकं प्रति ॥ १४ ॥

तटं वै रथवाहिन्याः प्राप्य ये न वसन्ति हि ।
तेषां यमालये वासो विद्यते नात्र संशयः ॥ १५ ॥

रथप्राट् वर्ण्यते पुण्या या वेदे मुनिसत्तमाः ।
तस्या माहात्म्यकथने न समर्थोऽस्मि सांप्रतम् ॥ १६ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे रथवाहिनीमाहात्म्यं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥**

---

८. ने$_3$. a–d ⊙. –f) ने$_1$ वराः (→वरा). १०. –d) ने$_{1.3}$ °हराः (→°हरा). १०. –b) ने$_1$ °जिताः (→°जिता). –d) ने$_2$ एव या (→एका या). ११. –c) ने$_1$ याति (→यान्ति). –f) ने$_1$ न संशयः (→मयोदितम्). १२. –d) ने$_3$ वै (→ते). १४. –a) ने$_3$ °शार्दूल (→°शार्दूला). –b) ने$_2$ सप्तमे (→सप्तमं). –d) ने$_1$ याति (→यान्ति).

# २७

ऋषय ऊचुः ।

अधुना रथवाह्नियास्तीर्थानां वर्णनं परम् ।
श्रोतुमिच्छामो विप्रर्षे त्वत्तो हि बहुविस्तरम् ॥ १ ॥

व्यास उवाच ।

माहात्म्यं हि महाभागास्तीर्थानां विस्तरेण च ।
अपि वर्षशतैः साग्रैः शक्यते नाधुना कृतः ॥ २ ॥

संक्षेपेण कथिष्यामि (?) शृण्वन्तु मुनिसत्तमाः ।
मूले तु रथवाह्निया जलमध्यगतं हरिम् ।
संपूज्य मानवः सम्यग् गोवधाद् विप्रमुच्यते ॥ ३ ॥

ततः सरस्वतीसङ्गे सन्निमज्ज्य द्विजोत्तमाः ।
महेन्द्रभवनं पुण्यं प्राप्नोति नहि संशयः ॥ ४ ॥

ततस्तु गौतमीसङ्गे पुण्यमस्ति तपोधनाः ।
तत्र स्नात्वा च मनुजः पातकाद् वचसा कृतात् ।
विमुच्यति महाभागास्तथैव मनसा कृतात् ॥ ५ ॥

ततस्तु रथवाह्निया वामे देवतटं स्मृतम् ।
तत्र देवतटे स्नात्वा नरो वै मुक्तिभाग् भवेत् ॥ ६ ॥

ततस्तु शकटीसङ्गं पुण्यमस्ति तपोधनाः ।
शकटीरथवाह्नियोः सङ्गे स्नात्वा च शङ्करम् ।
संपूज्य मुक्तिमाप्नोति प्रसादाच्छूलपाणिनः ॥ ७ ॥

नदी सारा तु वै विप्राः सङ्गमे संगता शुभा ।
तयोर्मध्ये महादेवीं कपालीं पूजयेत् ततः ॥ ८ ॥

---

१. –c) ने1.2 इच्छामि (→इच्छामो). २. –c) ने1 साग्नैः (→साग्रैः). ३. –d) ने1 °मध्ये, ने2 °मध्यं (→°मध्य–). ४. –a) ने1 °संगं (→°सङ्गे). –b) ने1 मुनि निमज्ज्य (→संनिमज्ज्य). –d) ने1 महेन्द्रं भुवनं, ने2 महेन्द्रभुवनं, ने3 महेन्द्रं भवनं (→महेन्द्रभवनं). ५. –a) ने1 °संग (→°सङ्गे). –d) ने2 कृताः (→कृतात्). –f) ने1.2 कृतान् (→कृतात्). ६. –a) ने3 °वाह्नियोः (→°वाह्निया). –b) ने2 °तरं (→°तटं). ७. –c) ने3 °वाह्नियाः (→°वाह्नियोः). –f) ने2 प्रसादं छूल° (→प्रसादाच्छूल°).

ततो द्रोणाद्रिसंभूता वैताली सरितां वरा।
सङ्गमे रथवाहिन्याः सङ्गता द्विजसत्तमाः।
तत्र स्नात्वा च मनुजा दुःकृताद् वितरन्ति हि॥ ९॥

ततस्तु रथवाहिन्या वामे नागार्जुनो गिरिः।
यत्र वै चार्जुनो नाम नागः संपूज्यते द्विजाः॥ १०॥

तथैव दक्षिणे भागे नाम्ना चासुरपर्वतः।
यत्र संपूज्यते कालो असुरैर्द्विजसत्तमाः॥ ११॥

नागार्जुनेति यः ख्यातो मया वै पर्वतोत्तमः।
तस्य कुक्षौ महादेवो दक्षिणे द्विजसत्तमाः॥ १२॥

विभाण्डेशेति विख्यातो देवगन्धर्वपूजितः।
यं सुपूज्य महाभागा नान्यं कृत्यं वदन्ति हि।
मुनयो वेदविदुषः सत्यव्रतपरायणाः॥ १३॥

ख्यायते यो महाभागा लिङ्गरूपधरः स्वयम्।
दक्षिणे बाहुसंज्ञो वै देवर्षिगणसेवितः॥ १४॥

यत्र वै मेनका रम्भा हरिणी च तिलोत्तमा।
तोषणार्थं हि देवस्य नृत्यन्ति द्विजसत्तमाः॥ १५॥

**इति श्रीस्कन्दपुराणे मानसखण्डे रथवाहिनीतीर्थमाहात्म्यं नाम सप्तविंशतितमोऽध्यायः॥ २७॥**

---

११. -d) ने₁ °सत्तमा (→°सत्तमाः). १२. -d) ने₁ °सत्तमा (→°सत्तमाः). १३. -a) ने₁ विख्यातं (→विख्यातो). -e) ने₃ मुनयोः (→मुनयो); ने₁ °विदुखः (→°विदुषः). -f) ने₁ °परायणा (→°परायणाः). १५. -d) ने₁ °सत्तमा (→°सत्तमाः).

# २८

सूत उवाच ।

श्रुत्वा ते रथवाहिन्या माहात्म्यं चातिविस्तरम् ।
विभाण्डेशस्य माहात्म्यं पप्रच्छुस्तदनन्तरम् ॥ १ ॥

ऋषय ऊचुः ।

श्रुतं हि रथवाहिन्या माहात्म्यं मुनिसत्तम ।
विभाण्डेशस्य चाख्यानं वक्तुमर्हसि वै प्रभो ॥ २ ॥

व्यास उवाच ।

विभाण्डेशस्य चाख्यानं शृण्वन्तु मुनिसत्तमाः ।
दुष्टोपद्रवरोगानां हेतुभूतं हि नाशने ॥ ३ ॥

यस्यार्चनपराः सर्वे समहेन्द्रचतुर्मुखाः ।
विद्यते देवता विप्रास्तस्मात् कोऽन्यो महेश्वरः ॥ ४ ॥

यस्य संदर्शनाद् विप्रा वाजिमेधसमं फलम् ।
प्राप्यते यस्य वै विप्रास्तस्मान् नान्यो भुवःस्थले ॥ ५ ॥

मा यजन्त्वश्वमेधेन मा हरं परिकीर्त्तयेत् ।
विभाण्डेशं हरं लोकाः पश्यन्त्वादरपूर्वकम् ॥ ६ ॥

मा स्मरन्त्विह विश्वेशं मा काशिं शिववल्लभाम् ।
स्मरन्त्वेकं महादेवं विभाण्डेशं तपोधनाः ॥ ७ ॥

दशवर्षसहस्राणि उषित्वा काशिमण्डले ।
विश्वेशपूजनाद् विप्रा यत्पुण्यं समवाप्यते ॥ ८ ॥

तत्पुण्यं मुनिशार्दूला विभाण्डेशस्य दर्शनात् ।
सर्वक्षेत्रोत्तमक्षेत्रं मयैतत् समुदाहृतम् ॥ ९ ॥

---

१. –a) ने2.3 श्रुतं हि (→श्रुत्वा ते); ने1 ऋषयो राजन् (→रथवाहिन्या). –b) ने2 मुनिसत्तम (→चातिविस्तरम्). २.–d) ने1 श्रोतुमिच्छामहे वयम्. ३. ने3.⊙. ४. –b) ने1 महेन्द्राः स (→समहेन्द्र–). –d) ने2 भुवस्पते (→महेश्वरः). ५. –c) ने1 विप्रा (→विप्रास्). –d) ने3 भुवस्थले (→भुवःस्थले). ६. –a) ने2 नापतंत्वश्वमेधेन. –c) ने3 हरिं (→हरं). ७. –a) ने2.3 न (→मा). –b) ने1 काशि, ने3 काश (→काशिं). ८. –b) ने1 उखित्वा, ने2 दुखित्वा (→उषित्वा). ९. –c) ने1 सर्वक्षेत्रोत्तमं क्षेत्रं.

यत्र संस्थापयामास शङ्करो दक्षिणं करम् ।
तस्मादन्यतमं क्षेत्रं कथं संकथयाम्यहम् ॥ १० ॥

ऋषय ऊचुः ।

कथं वै दक्षिणं बाहुं शङ्करो मुनिसत्तमः ।
तत्र संस्थापयामास एतत् कथय साम्प्रतम् ॥ ११ ॥

व्यास उवाच ।

समुद्वाह्य गिरेः कन्यां पार्वतीं मुनिसत्तमाः ।
शयनं वाञ्छयामास तया सह महेश्वरः ॥ १२ ॥

स वाञ्छन् शयनं विप्रा हिमाद्रिं प्रययौ स्वयम् ।
सेवितो रुद्रकन्याभिः गन्धर्वैस्त्रिदशैरपि ॥ १३ ॥

संप्राप्तं शङ्करं दृष्ट्वा सिद्धगन्धर्वसेवितम् ।
शङ्करं पूजयामास अर्घ्याद्यैः स हिमाचलः ॥ १४ ॥

प्रणम्य च यथान्यायं संपूज्य विधिपूर्वकम् ।
किं करोमीति तं देवमुवाच हिमपर्वतः ॥ १५ ॥

ततो हिमालयं विप्राः प्रत्युवाच महेश्वरः ।
शयनाय स्थलं त्वत्तः प्राप्तुमिच्छामि पर्वत ॥ १६ ॥

ततो हिमालयो विप्राः प्रहृष्टेनान्तरात्मना ।
प्रत्युवाच महादेवं सृष्टिसंहारकारकम् ॥ १७ ॥

धन्योऽस्म्यनुगृहीतोऽस्मि ममोपरि महेश्वर ।
कुरुष्व शयनं भद्रं यावदाहूतसंप्लवम् ॥ १८ ॥

हिमाद्रिवचनं श्रुत्वा स देवो मुनिसत्तमाः ।
सुष्वाप शयने दिव्ये हिमसीकरसेविते ॥ १८ ॥

शिखरेषु महाभागाः सन्निधाय शिरांसि वै ।
कटिं कृत्वा महादेवः सुपुण्ये नीलपर्वते ॥ २० ॥
भुजं नागार्जुने पुण्ये वामकं भुवनेश्वर ।
कृत्वा पुण्ये महाभागाश्चरणौ दारुकानने ।
सुखं सुष्वाप देवेशो भवान्या प्रियया सह ॥ २१ ॥

---

१०. –c) ने$_1$ क्षत्रं(→क्षेत्रं). ११. –a) ने$_1$ बाहु (→बाहुं ) –b) ने$_{2\ 3}$ °सत्तमाः (→°सत्तमः) १२. –b) ने$_2$ पार्वती (→पार्वतीं). १४. –d) ने$_1$ अर्घाद्यैः (→ अर्घ्याद्यैः) १६. –a) ने$_3$ हिमालयो (→ हिमालयं ). –b) ने$_3$ महेश्वरं (→महेश्वरः). –d) ने$_1$ पंचत (→पर्वत). १८. –d) ने$_3$ यावदाद्भूत° (→यावदाहूत°). २१. –a) ने$_1$ सव्यं (→पुण्ये). –e) ने$_1$ शुष्वाप (→सुष्वाप).

यथा संस्थापयामास स्वभुजं परमेश्वरः ।
तथैव कथितं विप्राः किमन्यत् प्रष्टुमिच्छथ ॥ २२ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे विभाण्डेश्वरमाहात्म्यं नामाष्टविंशतितमोऽध्यायः ॥ २८ ॥**

## २६

ऋषय ऊचुः ।

सर्वक्षेत्रोत्तमं क्षेत्रं सर्वंतीर्थोत्तमोत्तमम् ।
कथयस्व प्रसादेन यद् गोप्यमपि सुव्रत ॥ १ ॥

व्यास उवाच ।

विभाण्डेशसमं क्षेत्रं नान्यं पश्यामि भूतले ।
पातकानां विनाशाय पुरा वै पद्मयोनिना ।
प्रकाशितं महाभागा नारदाय महात्मने ॥ २ ॥

ऋषय ऊचुः ।

कथं हि ब्रह्मणा ब्रह्मन् नारदाय महात्मने ।
कथितं ब्रह्मभुवने तत्त्वं कथय सुव्रत । ३ ॥

व्यास उवाच ।

पुरा कृतयुगस्यादौ ब्रह्मलोकगतो मुनिः ।
ददर्शं लोकनाथेशं ब्रह्माणं देवपूजितम् ॥ ४ ॥

तत्र गत्वा महाभागः प्रणिपत्य पुनः पुनः ।
पप्रच्छ स विधातारं नारदो मुनिसत्तमाः ॥ ५ ॥

नारद उवाच ।

त्वामहं प्रष्टुमिच्छामि लोकनाथ नमोऽस्तु ते ।
पातकैर्लिप्तदेहानां मनुष्याणां दुरात्मनाम् ॥ ६ ॥

पितृमातृद्रुहाणां च तथा पैशुन्यकारिणाम् ।
कस्मिन् क्षेत्रे महाभाग विमुक्तिर्जायते नृणाम् ॥ ७ ॥

कस्त्वया ज्ञायते ब्रह्मन् सर्वक्षेत्रोत्तमोत्तमः ।
कुत्र सन्तर्प्य पितरः प्राप्नुवन्ति जलं शुभम् ।
एतद् वेदितुमिच्छामि त्वत्तो लोकपितामह ॥ ८ ॥

---

२. -a) ने। विभांडेशसमं, + सर्वतीर्थोत्तमो (→विभाण्डेशसमं). ५. –b) ने। प्रणि*त्यः (→प्रणिपत्य).

व्यास उवाच ।

इति नारदवाक्येन बोधितो द्विजसत्तमाः ।
उवाच वचनं पुण्यं ब्रह्मा लोकपितामहः ॥ ९ ॥

ब्रह्मोवाच ।

शृणुष्व वत्स भद्रं ते यथावत् कथयामि ते ।
बोधितोऽस्मि सुपुत्रेण शृणुष्व सुसमाहितः ॥ १० ॥
हिमालयतटे रम्ये सिद्धगन्धर्वसेविते ।
तापसानामृषीणां च आश्रमैर्बहुभिर्वृते ॥ ११ ॥
नागार्जुनेति विख्यातः पर्वतो वर्ण्यते भुवि ।
वामे वै रथवाहिन्या नागराजनिषेवितः ।
तस्य कुक्षौ महादेवो विभाण्डेशेति विश्रुतः ॥ १२ ॥
तस्य संदर्शनात् पुत्र मनुष्याणां दुरात्मनाम् ।
पातकानि विलीयन्ते हिमवद् भास्करोदये ॥ १३ ॥
राजसूयस्य यज्ञस्य विभाण्डेशस्य पूजनात् ।
प्राप्यते मुनिशार्दूल फलं वै नात्र संशयः ॥ १४ ॥
पातकैर्लिप्तदेहानां मानवानां द्विजोत्तम ।
पूजाभिस्तुषितः शम्भुः सैव मुक्तिं प्रयच्छति ॥ १५ ॥
विश्वनाथं समभ्यर्च्य उषित्वा परिवत्सरम् ।
यत्फलं प्राप्यते वत्स तद्विभाण्डेशदर्शनात् ॥ १६ ॥
तत्रैव सुरभी पुण्या मया संप्रेषिता सुत ।
सरिद्रूपेण लोकानां पावनार्थं प्रयाति हि ॥ १७ ॥
नागार्जुनगिरेः पुण्याद् विनिःसृत्य सरिद्वरा ।
विभाण्डेशस्थलं पुण्यं ययौ पापप्रणाशिनी ॥ १८ ॥
द्रोणाद्रिपादसंभूता नन्दिनी च महानदी ।
सुरभीसङ्गमे पुत्र ययौ तीर्थैर्विराजिता ।
तयोर्मध्ये विभाण्डेशं जानीहि ऋषिसत्तमाः ॥ १९ ॥
सुरभीसरितोर्मध्ये विभाण्डेशं महेश्वरम् ।
ये पूजयन्ति मनुजास्ते यान्ति शिवमण्डले ॥ २० ॥

१०. –b) ने3 कथयाम्यहं (→कथयामि ते). ११. –a) ने1 °पटे (→°तटे).
१४. –d) ने1*(→वै). १६. –b) ने1 दुखित्वा (→उषित्वा).
१९. –f ) ने3 मुनिसत्तम (→ऋषिसत्तमाः).

अज्ञानाद् ज्ञानतो वापि विभाण्डेशं महेश्वरम् ।
ये स्पृशन्ति महाभाग ते यान्ति शिवमन्दिरम् ॥ २१ ॥
अज्ञानादपि वै वत्स बहवः पापकारिणः ।
स्पर्शमात्राद् दिवं प्राप्ता वको मत्स्याशनाद् यथा ॥ २२ ॥

नारद उवाच ।

वको मत्स्याशनाद् ब्रह्मन् कथं शिवपुरं गतः ।
विभाण्डेशं कथं प्राप कथं संस्पृष्टवान् पुरा ॥ २४ ॥

ब्रह्मोवाच ।

वकः कश्चिन् महाभाग बभूव हिमपर्वते ।
मत्स्याशनेन दिवसान् निनायाज्ञानकातरः ॥ २५ ॥
सुरभीसरितोर्मध्ये हत्वा मत्स्यान् महावकः ।
विभाण्डेशस्य शिरसि स्थापयित्वा चखाद ह ॥ २६ ॥
एवं हि कतिचित्कालं कुर्वंस्तस्य दुरात्मनः ।
जगाम मुनिशार्दूल मत्स्यान् हत्वा दिने दिने ॥ २७ ॥
ततः कालेन महता तत्रैव स वकाधमः ।
पञ्चत्वमगमत् ब्रह्मन् तत्रैव सुरभीतटे ॥ २८ ॥
ततो याम्यैर्यमपुरं ददृशुः शिवकिङ्कराः ।
नीयमानं दुराचारं बध्वा पाशैः सुयन्त्रितैः ॥ २९ ॥
शिवस्पर्शेन संपूतं वकं तं शिवकिङ्कराः ।
प्रत्यानेतुं शिवपुरं ययुर्याम्यान्? प्रति द्विजः ।
ऊचुस्ते तान् महाभाग त्यजन्तु वकनायकम् ॥ ३० ॥
नीयतेऽस्माभिर्देवस्य पदे देवर्षिसेविते ।
प्रत्यूचुर्यमदूतास्ते तान् वै शङ्करवल्लभान् ॥ ३१ ॥

यमदूता ऊचुः ।*

न त्यजाम महाभागाः पापं मत्स्याशिनं वकम् ।
धर्ममार्गविहीनं वै पापमार्गरतं जडम् ॥ ३२ ॥

---

२१. –a) ने1 चापि (→वापि).
२६. –a) ने1 सुरभि° (→सुरभी°). २७. –a) ने1 एवं तस्य कियत्कालं.
२८. ने1. cd⊙.
*. ने1 यमदूत उवाच.
३२. –b) ने1 पाप–(→पापं). –c) ने2 °विहीनैव (→°विहीनं वै).

नानेनेष्टादिपूर्त्तं वै नानेनाराधितो हरः।
नानेन सरितां श्रेष्ठा स्नाता भागीरथी शुभा ॥ ३३ ॥

कथमस्य महाभागा वासः शिवगृहे भवेत्।
यमलोके वकस्यास्य वासो धात्रा विकल्पितः ॥ ३४ ॥

तच्छ्रुत्वा यमदूतानां वचनं शिवकिङ्कराः।
प्रत्युचुस्तान् महाभाग शक्तिशूलधरा हि ते ॥ ३५ ॥

नास्य पुण्यमतं दूता भवद्भिर्ज्ञायते क्वचित्।
गोप्रबालघ्नब्रह्मघ्नो जनः संशुद्धयते क्षणात्।
तन्मतं भवतां दूता न ज्ञानं सत्यमेव हि ॥ ३६ ॥

कथं न ज्ञायते दूता विभाण्डेशस्य पूजनम्।
यं समर्प्य महामत्स्या खादिताऽनेन चारुणा ॥ ३७ ॥

ब्रह्मोवाच।

इत्युक्ता यमदूतैस्तं वकं संमुच्य किङ्कराः।
नीत्वा यावच्छिवपुरं गन्तुं ते परिरेभिरे ॥ ३८ ॥

तावद् याम्याः शिवगणानूचुर्वै मुनिसत्तम।
अहत्वाऽस्मान् महाभागा वको नेतुं न शक्यते।
विजित्यास्मान् शिवपुरं वकः सन्नीयतां गणाः ॥ ३९ ॥

इत्युक्ता(क्त्वा?) यमदूतास्ते शक्तिशूलपरश्वधैः।
युयुधुः सुरसङ्घैश्च ततः शिवगणैः सह ॥ ४० ॥

तेषां सुतुमुलं युद्धं बभूवुर्मुनिसत्तम।
नानाप्रहरणोदग्रं भीरूणां भयवर्द्धनम् ॥ ४१ ॥

ततो याम्या महाभाग क्षीणप्रहरणायुधाः।
जिताः शिवगणैः सर्वे ययुर्यमपुरं प्रति ॥ ४२ ॥

जित्वा याम्यान् महाभाग ततस्ते शिवकिङ्कराः।
अधिरोप्य विमानाग्रे वकं वै द्विजसत्तम ॥ ४३ ॥

---

३४. –b) ने1 °गृहं (→°गृहे). –c) ने2.3 यमालोके (→यमलोके). ३५ –c.) ने1 प्रत्युचुस्त–, ने3 प्रत्युचुस्तन् (→प्रत्युचुस्तान्) ३६. –c) ने2.3 ब्रह्मघ्नो बालक प्रोक्ता. ३७ –d) ने2 चारण (→चारुणा). ४०. –c) ने1.2 शर° (→सुर°). ४१. –b) ने1.2 बभूव (→बभूवुर्). ४३. –b) ने1 °किंकरा (→°किङ्कराः).

नीत्वा शिवपुरं पुण्यं ययुः सर्वे समाहिताः ।
याम्यापि मुनिशार्दूल रोदमाना मुहुर्मुहुः ।
यमं विज्ञापयामासुः शिवकिङ्करचेष्टितम् ॥ ४४ ॥

तेषां तद्वचनं श्रुत्वा धर्मराजो महामनाः ।
चित्रगुप्तं समाहूय वकधर्मविनिर्णयम् ॥ ४५ ॥

न किञ्चिद् दृष्टवान् तस्य सुकृतं मुनिसत्तम ।
विभाण्डेश्वरसंस्पर्शमेकमेव ददर्श ह ॥ ४६ ॥

तथैव सुरभीमध्ये मरणं मुनिसत्तम ।
एतद् विचार्य सुचिरं चित्रगुप्तो महायमम् ॥ ४७ ॥

बोधयामास विधिवद् विभाण्डेशस्य भारतीम् ।
बोधितश्चित्रगुप्तेन यमः स्वस्थमना भवत् ॥ ४८ ॥

वकोऽपि शिवलोकं वै प्राप्य सिद्धनिषेवितम् ।
स रेमे रुद्रकन्याभिः शिववद् द्विजसत्तम ॥ ४९ ॥

विभाण्डेशं हरं प्राप्य ये सम्यक् प्रणमन्ति हि ।
भुक्ति मुक्ति महाभाग विन्दन्ते न हि संशयः ॥ ५० ॥

व्यास उवाच ।

ब्रह्मणो वचनं श्रुत्वा नारदो मुनिसत्तमाः ।
परिक्रम्य विधातारं तुष्टः प्रत्याययौ दिवम् ॥ ५१ ॥

इत्येतत् कथितं विप्रा माहात्म्यं बहुविस्तरम् ।
सर्वपापप्रशमनं विभाण्डेशकथान्वितम् ।
यः शृणोति हरस्याग्रे पातकैः स प्रमुच्यते ॥ ५२ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे विभाण्डेश्वरमाहात्म्ये एकोनत्रिंशतितमोऽध्यायः ॥ २९ ॥**

---

४४. –f) ने3 °चेष्टितैः (→°चेष्टितम्).

४५. श्लोकात्परं ने2 अधिकम्—

"कारयामास वै विप्र यथावस्तुसमाह्वितः ।
विचार्य सुचिरं कालं धर्माधर्मविनिर्णयम् ॥"

५०. –c) ने1 भुक्तिमुक्ति (→भुक्ति मुक्ति). –d) ने1 मुनिसत्तमः (→नहि संशयः).

## ३०

ऋषय ऊचुः ।

सुरभीसरितोर्मध्ये तीर्थानां वर्णनं शुभम् ।
श्रोतुमिच्छाम विप्रर्षे त्वत्तो ज्ञानसमुच्चयात् ॥ १ ॥

व्यास उवाच ।

सम्यग् व्यवसितं विप्रा भवतां नात्र संशयः ।
येषां तीर्थकथायां वै संभूता मतिरीदृशी ॥ २ ॥
पुरा देवसमाजे वै ब्रह्मा लोकपितामहः ।
धेनुमाज्ञापयामास प्रियार्थं शङ्करस्य च ॥ ३ ॥

ब्रह्मोवाच ।

व्रज भद्रे महादेवं विभाण्डेशं सुपूजितम् ।
सरिद्रूपेण तं देवं सेवयस्व समाहिता ॥ ४ ॥

व्यास उवाच ।

विधातुर्वचनं मूर्ध्ना सुरभी प्रतिगृह्य वै ।
ययौ नागार्जुनगिरिं नन्दिन्या सह सुव्रता[ः] ॥ ५ ॥
तत्रैकेन स्वरूपेण सुरभी सरितां वरा ।
पुण्यतोयवहा शुद्धा बभूव मुनिसत्तमाः ॥ ६ ॥
तत्र वै सुरभीमूले सौरभेयं महाह्लदम् ।
तत्र स्नात्वा च विधिवत् सर्वपापैः प्रमुच्यते ॥ ७ ॥
ततो वामे महादेवी सुरभी नाम वै द्विजाः ।
संपूज्य मानवः सम्यक् सर्वान् कामानवाप्नुयात् ॥ ८ ॥
दक्षिणे मुनिशार्दूला गुहायां वृद्धसंज्ञकम् ।
विभाण्डेशं महादेवं संपूज्य शिवमाप्नुयात् ॥ ९ ॥
ततस्तु सुरभीमध्ये सूर्यतीर्थमिति स्मृतम् ।
तत्र स्नात्वा च मनुजः पातकाद् विप्रमुच्यते ॥ १० ॥

---

१. c–) ने3 °मिच्छामो (→°मिच्छाम). २. –c) ने1 तेषां (→येषां). ३. –b) ने1 °पितामह (°पितामहः). ४. –a) ने1 व्रजं (→व्रज); ने2 °देवीं (→°देवं). ने1.५ –६ab(·). ८. –b) ने1 द्विजा (→द्विजाः).

परं हि सुरभीमध्ये द्रोणतीर्थमिति स्मृतम् ।
तत्र स्नात्वा महाभागा वसून् संलभ्यते नरः ॥ ११ ॥

द्रोणाद्रिपादे संभूता नन्दिनी चापि सुव्रता ।
सुरभीसङ्गमं भूता सर्वपापप्रणाशिनी ॥ १२ ॥

नन्दिनीसुरभीमध्ये ब्रह्मतीर्थमिति स्मृतम् ।
तत्र स्नात्वा यथान्यायं संतर्प्य च पितॄंस्तथा ॥ १३ ॥

यः पूजयति देवेशं विभाण्डेशं तपोधनाः ।
त्रिसप्तकुलभिः सर्वैः स्वर्गलोके महीयते ॥ १४ ॥

वामे वाणीश्वरं देवं दक्षिणे त्रिपुरेश्वरम् ।
संपूज्य मानवः सम्यक् सर्वपापैः प्रमुच्यते ॥ १५ ॥

ततः शेषह्रदे पुण्ये निमज्य विधिपूर्वकम् ।
शेषनागं च संपूज्य मुक्तिमाप्नोति मानवः ॥ १६ ॥

ततः सरस्वतीसङ्गं पुण्यमस्ति तपोधनाः ।
निमज्य विधिवत् तत्र ब्रह्मलोके महीयते ॥ १७ ॥

ततो बालिह्रदं नाम तीर्थमस्ति यतव्रताः ।
तत्र बालिह्रदे स्नात्वा मानवो मुक्तिभाग्भवेत् ॥ १८ ॥

बालिह्रदस्य वामे वै शीतलां शङ्करप्रियाम् ।
संपूज्य ज्वरभीतिं वै मानवानां प्रणश्यति ॥ १९ ॥

सन्ति तीर्थान्यनेकानि सुरम्या हि (णि?) ह्रदे ह्रदे ।
संक्षेपेण महाभागाः कथितानि न संशयः ॥ २० ॥

ततः सा सुरभी पुण्या सुपुण्यां रथवाहिनीम् ।
संमिलन् मुनिशार्दूलाः सर्वपापप्रणाशिनीम् ॥ २१ ॥

तयोर्मध्ये महादेवं श्मशाननिलयं हरम् ।
संपूज्य मानवः सम्यक् सर्वपापैः प्रमुच्यते ॥ २२ ॥

तदूर्ध्वं मुनिशार्दूला विनता सरितां वरा ।
कश्यपस्य ऋषेः पुण्या अनुज्ञां प्राप्य शोभना ॥ २३ ॥

---

११. -d) ने1 सूनिन् (→वसून्). १२. -a) ने2 द्रौणाद्रि° (→द्रोणाद्रि°). -d) ने1 °संगमे (→°संगमं). १४. -d) ने1 शिव° (→स्वर्ग°). १८. -b) ने1 तपोधनाः (→यतव्रताः). २१. -a) ने1 सुरभि (→सुरभी). २१ -b) ने1 °वाहिनो (→°वाहिनीम्). २३. -c) ने2 ऋषिः (→ऋषेः). -d) ने1 सोभना (→शोभना).

कुमुदाद्रौ महापुण्या सुपर्णजननी शुभा ।
बभूव सरितां श्रेष्ठा सर्वपापप्रणाशिनी ।
तस्यां स्नात्वा च मनुजो मोदते स्वामिवद्दिवि ॥ २४ ॥

ततस्तु काश्यपी नाम विनता सङ्गमं ययौ ।
तत्र स्नात्वा नरः सम्यग् विपाप्मा च भवेदिह ॥ २५ ॥

कुमुदपर्वतसंभूता काश्यपी सरितां वरा ।
सुपुण्ये रथवाहिन्याः सङ्गमे सङ्गता द्विजाः ॥ २६ ॥

काश्यपीवामभागे वै नाम्ना देवी कुमुद्वती ।
पूज्यते देवगन्धर्वैः दैत्यैयैश्च तपोधनाः ॥ २७ ॥

काश्यपीरथवाहिन्योर्मध्ये संस्नाप्य मानवः ।
महर्षिं कश्यपं पूज्य देवलोके महीयते ॥ २८ ॥

पुण्या जीवनदा नाम दक्षिणद्वारवाहिनी ।
विमुक्ताः सर्वपापैस्तु गच्छन्ति शिवमन्दिरम् ॥ २९ ॥

द्रोणपादसमुद्भूता नाम्ना कौमोदकी सरित् ।
काश्यपीसङ्गमे विप्रा यत्र कौमोदकी सरित् ।
सङ्गता तत्र वै विप्राः सर्वपापप्रणाशिनी ॥ ३० ॥

तत्र स्नात्वा महाभागा देवीं कौमोदकीं शुभाम् ।
संपूज्य मानवः सम्यक् सर्वपापैः प्रमुच्यते ॥ ३१ ॥

काश्यपीरथवाहिन्योः सुपुण्यात् सङ्गमात् परम् ।
कौश्वतीर्थमिति ख्यातं सत्यधर्मप्रदर्शकम् ।
तत्र स्नात्वा महाभागा देवलोकमवाप्यते ॥ ३२ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे विभाण्डेश्वरमाहात्म्ये त्रिंशतितमोऽध्यायः ॥ ३० ॥**

---

२४. –a) ने2 कमुदाज्ञै, ने3 कुमुदाद्य (→कुमुदाद्रौ). –f) ने1 स्वर्ण° (→स्वामि°).
२५. –a) ने1 काश्यपा (→काश्यपी). –d) ने1 विशुद्धात्मा, ने2 विपाप्मा हि (→विपाप्मा च). २७. –a) ने1 काश्यपा° (→काश्यपी°). २८. –b) ने1 *स्नाप्य (→संस्नाप्य).

ने2. २८ cd- २९ ab⊙; ने3 २९ab⊙.

ने3. ३० ab चरणात् परमधिकम् —
'संगता तत्र वै विप्रा संगमे मुनिसत्तमाः ।'

३१. –b) ने2 देवी कौमोदकी शुभाम्. –d) ने2 °पापः (→°पापैः)

THE BOARD OF TRUSTEES

OF

THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A., D.Litt.; Fort, Ramnagar, Varanasi.—(*Chairman*).

*Trustee nominated by the Govt. of India:—*

2. Dr. Raghunath Singh, M.A., Ph.D., D.Litt., LL.B.; Varanasi.

*Trustees nominated by the Govt. of Uttar Pradesh :—*

3. Pt. Kamalapati Tripathi, Member of Parliament; New Delhi.

4. Vacant.

*Trustees nominated by His Highness the Maharaja of Banaras.*

5. Maharaj-Kumar Dr. Raghubir Sinh, M.A., D. Litt.; Raghubir Niwas, Sitamau (Malwa).

6. Pt. Giridhari Lal Mehta, Varanasi; Managing Director : Jardine Handerson Ltd.; Scindia Steam Navigation Ltd. Trustee : Vallabhram-Saligram Trust, Calcutta.

7. Padmabhushan, Pt. Baladeva Upadhyaya, M.A., Sahityacharya, Vachaspati; Formerly Director, Sampurnananda Sanskrit University; Ravindrapuri, Varanasi.

Donation made to All-India Kashi Raj Trust, Fort Ramnagar, Varanasi, will qualify for exemption under Sec. 80G of the Income Tax Act, 1961 in the hands of donors.

Statement of ownership and other particulars about

## पुराणम्—PURĀṆA

| | | |
|---|---|---|
| 1. | Place of Publication | ....Fort Ramnagar, Varanasi |
| 2. | Periodicity of Publication | ... Half-yearly |
| 3. | Printer's Name | ....Vinaya Shankar |
| | Nationality | ....Indian |
| | Address | ....Ratna Printing Works, B21/42 A, Kamachha, Varanasi |
| 4. | Publisher's Name | ....Yogendra Narain Thakur General Secretary, All-India Kashiraj Trust |
| | Nationality | ....Indian |
| | Address | ....All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |
| 5. | Editors' Name with Address | ....R. K. Sharma (Varanasi), Dr. R. N. Dandekar (Pune), R. S. Bhattacharya (*Editor*) (Purāṇa Deptt., Fort Ramnagar Varanasi). |
| | Nationality | ....Indian. |
| 6. | Name of the owner | ....All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |

I, Yogendra Narain Thakur, hereby declare that the particulars given above are true, to the best of my knowledge.

**Yogendra Narain Thakur**
Publisher.

Printed at the Ratna Printing Works, Kamachcha, Varanasi.